# APPENDIX – I

## 1. Quotations from *Aṣṭādhyāyī* of Pāṇini

| | | | |
|---|---|---|---|
| १. | लः कर्मणि च भावे० । | ३.४.६९ | VBS P.29, P.33; 543; 550 |
| २. | कर्तरि कृद्। | ३.४.६७ | VBS P.29, P.33; P.102; 546 |
| ३. | अनेकमन्यपदार्थे। | २.२.२४ | VBS 41, 360, 450, 451 |
| ४. | साऽस्य देवता। | ४.२.२४ | VBS 41, 504 |
| ५. | वर्तमाने लट्। | ३.२.१२३ | VBS 47 |
| ६. | कर्मवत्कर्मणा तुल्यक्रियः। | ३.१.८७ | VBS 73, 94, 134 |
| ७. | दीपजनबुध० । | ३.१.६१ | VBS 74 |
| ८. | चिणो लुक्। | ६.४.१०४ | VBS 74 |
| ९. | प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्। | १.२.९६ | VBS 103 |
| १०. | ऋहलोर्ण्यत्। | ३.१.१२४ | VBS 116 |
| ११. | कर्तृकरणे कृता बहुलम्। | २.१.३२ | VBS 117, 117 |
| १२. | अन्नेन व्यञ्जनम्। | २.१.४३ | VBS 117 |
| १३. | सह सुपा। | २.१.४ | VBS 121 |
| १४. | गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। | २.३.१२ | VBS 121 |
| १५. | भूवादयो धातवः। | १.३.१ | VBS 122, 126 |
| १६. | आतो धातोः। | ६.४.१४० | VBS 124 |
| १७. | कर्तृकर्मणो कृतिः। | २.३.६५ | VBS 138 |

| | | | |
|---|---|---|---|
| १८. | न लोकव्ययनिष्ठाखलर्थतृनाम्। | २.३.६९ | VBS 138 |
| १९. | तिङ्ङतिङः। | ८.१.२८ | VBS 146 |
| २०. | कारके। | १.४.२३ | VBS 146, 258 |
| २१. | तेन तुल्यं क्रिया चेद्वतिः। | ५.१.११५ | VBS 146 |
| २२. | धातुसम्बन्धे प्रत्ययाः। | ३.४.१. | VBS 146 |
| २३. | संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। | ५.४.१७ | VBS 146 |
| २४. | यस्य च भावेन भावलक्षणम्। | २.३.३७ | VBS 156 |
| २५. | षष्ठी चानादरे। | २.३.३८ | VBS 156 |
| २६. | तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्। | ३.३.१० | VBS 168 |
| २७. | समानकर्तृकयो पूर्वकाले। | ३.४.२१ | VBS 168, 526 |
| २८. | एकस्य सकृच्च। | ५.४.१९ | VBS 168 |
| २९. | द्वित्रिचतुर्भ्यः सुच्। | ५.४.१८ | VBS 168 |
| ३०. | द्विवचनेऽचि। | १.१.५९ | VBS 169 |
| ३१. | वर्तमाने लट्। | ३.२.१२३ | VBS 180 |
| ३२. | परोक्षे लिट्। | ३.२.११५ | VBS 186 |
| ३३. | अनद्यतने लुट्। | ३.३.१५ | VBS 192 |
| ३४. | लृट् शेषे च। | ३.३.१३ | VBS 192 |
| ३५. | लिङर्थे लेट्।। | ३.४.७ | VBS 192 |
| ३६. | आशिषि लिङ्लोटौ। | ३.३.१७३ | VBS 192 |
| ३७. | लोट् च। | ३.३.१६२ | VBS192 |
| ३८. | अनद्यतने लङ्। | ३.२.१११ | VBS195 |
| ३९. | विधिनिमन्त्रणामन्त्रणाधीष्ट० । | ३.३.१६१ | VBS 195 |
| ४०. | हेतुहेतुमतोर्लिङ्। | ३.३.१५६ | VBS 196 |
| ४१. | आशिषि लिङ् लोटौ। | ३.३.१७३ | VBS 196 |
| ४२. | लुङ्। | ३.२.११० | VBS 213 |
| ४३. | लिङ्निमित्ते लृङ् क्रियातिपत्तौ। | ३.३.१३९ | VBS 213 |

| | | | |
|---|---|---|---|
| ४४. | कर्मणि द्वितीया। | २.३.२ | VBS 217, 282, 283 |
| ४५. | कर्तुरीप्सिततमं कर्म। | १.४.४९ | VBS 217 |
| ४६. | तथायुक्तं चानीप्सितम्। | १.४.५० | VBS 217 |
| ४७. | स्वतन्त्रः कर्ता। | १.४.५४ | VBS 244 |
| ४८. | साधकतमं करणम्। | १.४.४२ | VBS 251 |
| ४९. | सप्तम्यधिकरणे च। | २.३.३६ | VBS 258 |
| ५०. | आधारोऽधिकरणम्। | १.४.४५ | VBS 258 |
| ५१. | संहितायाम्। | ६.१.७२ | VBS 258 |
| ५२. | अपादाने पञ्चमी। | २.३.२८ | VBS 262 |
| ५३. | पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्। | २.३.३२ | VBS 262 |
| ५४. | कर्मणा यमभिप्रैति स सम्प्रदानम्। | १.४.३२ | VBS 273 |
| ५५. | सप्तमीपञ्चम्यौ कारकमध्ये। | २.३.७ | VBS 282 |
| ५६. | स्वौजसमोट्छष्टाभ्याम्० । | ४.१.२ | VBS 283 |
| ५७. | द्वयेकयोर्द्विवचनैकवचने। | १.४.२२ | VBS 283 |
| ५८. | लस्य। | ३.४.७७ | VBS 283 |
| ५९. | तिप्-तस्-झि-सिप्० । | ३.४.७८ | VBS 283, 373 |
| ६०. | तान्येकवचन-द्विवचन० । | १.४.१०२ | VBS 283 |
| ६१. | अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। | १.२.४५ | VBS 330, 373 |
| ६२. | प्रत्ययः। | ३.१.१ | VBS 330 |
| ६३. | परश्च। | ३.१.२ | VBS 330 |
| ६४. | उपपदमतिङ्। | २.२.१९ | VBS 332 |
| ६५. | सह सुपा। | २.१.४ | VBS 332 |
| ६६. | अन्यपदार्थे च संज्ञायाम्। | २.१.२१ | VBS 336 |
| ६७. | अर्धं नपुंसकम्। | २.२.२१ | VBS 336 |
| ६८. | सुप्-प्रतिना मात्रार्थे। | २.१.९ | VBS 336 |
| ६९. | समर्थः पदाविधिः। | २.१.२ | VBS 341, 348, 509 |

| | | | |
|---|---|---|---|
| ७०. | विभाषा। | २.१.११ | VBS 366 |
| ७१. | कृत्तद्धितसमासाश्च। | १.२.४६ | VBS 372, 475 |
| ७२. | शेषो बहुव्रीहिः। | २.२.२३ | VBS 394 |
| ७३. | षष्ठी। | २.२.८ | VBS 394 |
| ७४. | नपुंसके भावे क्तः। | ३.३.११४ | VBS 444 |
| ७५. | सुबामन्त्रिने पराङ्गवत् स्वरे। | २.१.२ | VBS 451 |
| ७६. | एतत्तदोः सुलोपोऽकोरनञ्समासे हलि। | ६.१.१३२ | VBS 450 |
| ७७. | अव्ययादाप्सुपः। | २.४.८२ | VBS 475 |
| ७८. | तदस्यास्त्यस्मिन्निति मतुप्। | ५.२.९४ | VBS 489, 509 |
| ७९. | तस्य भावस्त्वतलौ। | ५.१.११९ | VBS 497 |
| ८०. | तदस्यां प्रहरणमिति क्रीडायां णः। | ४.२.५७ | VBS 509 |
| ८१. | सोऽस्य निवासः। | ४.३.८९ | VBS 509 |
| ८२. | साऽस्मिन्पौर्णमासीति। | ४.२.२१ | VBS 509 |
| ८३. | आद्गुणः। | ६.१.८७ | VBS 520 |
| ८४. | आर्द्धधातुकस्येड्वलादेः। | ७.२.३५ | VBS 520 |
| ८५. | रदाभ्यां निष्ठातो नः पूर्व्वस्य च दः। | ८.२.४२ | VBS 520 |
| ८६. | एकः पूर्वपरयोः। | ६.१.८४ | VBS 520 |
| ८७. | न लोपः प्रातिपदिकान्तस्य। | ८.२.७ | VBS 552 |
| ८८. | बहुवचनस्य वस्नसौ। | ८.१.२१ | VBS 555 |
| ८९. | एङः पदान्तादति। | ६.१.१०९ | VBS 557 |

## 2. Quotations from *Mahābhāṣya* of Patañjali

| | | | |
|---|---|---|---|
| १. | द्व्यर्थः पचिः।। | | |
| २. | कृदभिहितो भावो द्रव्यवत् प्रकाशते।। | | VBS 138, 144 |
| ३. | अग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियाऽर्थ ककारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञा।। | P. 146 | |

| | | | |
|---|---|---|---|
| ४. | इह भूतभविष्यद्वर्तमानानां राज्ञां क्रियस्तिष्ठेतरधिकरणम्।। | P. 180 | |
| ५. | क्रिया नामेयमत्यन्तन्तापरदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्।। | | VBS 186 |
| ६. | Check महाभाष्यम् on संहितायाम्।। | ६.१.७२. | VBS 258 |
| ७. | Check महाभाष्यम् on the वार्तिक-सुपां कर्मादयोऽऽप्यर्थाः...।<br>भाष्य - कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः।। | | VBS 282 |
| ८. | न ह्यकृतिपदार्थकस्य द्रव्यं न पदार्थः।। | | VBS 302 |
| ९. | गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः।। | | VBS 332 |
| १०. | अथतस्मिन् व्यपेक्षायां सामर्थ्य योऽसावेकार्थी भावकृतो विशेषः स वक्तव्यः। | (k 32) | VBS 349 |
| ११. | द्वयक्षरम् - इत्यादिभाष्येण। | | VBS 432 |
| १२. | निवृत्तपदार्थकः। | (नञ्सूत्रे महाभाष्यम्) | VBS 443 |

## 3. Quotations from *Vākyapadīyam* of Bhartṛhari

| | | | |
|---|---|---|---|
| १. | यावत् सिद्धमसिद्धं वा साध्यत्वेनाऽभिधीयते।<br>आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते।। | | VBS P. 19 |
| २. | असत्त्वभूतो भावश्च...।। | | VBS P. 21 |
| ३. | गुणभूतैरवयवैः...।। | | VBS P. 24 |
| ४. | क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका।। | | VBS 129 |
| ५. | आत्मानमात्मना विभ्रदस्तीति व्यपदिश्यते। | ४.७.२८९. | VBS 134 |
| ६. | सम्वोधनपदं यद्य तत् क्रियायां विशेषणम्। | द्वि.का.५. | VBS 146 |
| ७. | परतो भिद्यते सर्वमात्मा नु न विकल्पते।। | काल समु.८०. | VBS 180 |

| | | | |
|---|---|---|---|
| ८. | अस्ति प्रवर्तनारूपमनुस्यूतं चतुष्वपि।। न्यायव्युत्पादनार्थं व...।। | | VBS 195 |
| ९. | तिरोभावाभ्युपगमे भावानां सैव नास्तिता। ... प्रतीयते।। | वा.जाति ३.२१७ | |
| १०. | निर्वर्त्त्यञ्च विकार्य्यञ्च...। | का.साध.तृ.का ८९. | |
| ११. | तच्चोप्सिततमं कर्म्म...। | २३४ | |
| १२. | औदासीन्येन यत् प्राप्यं... | ४६.२३४ | |
| १३. | यदसज्जायते सद्वा जन्मना यत्प्रकाशते... | ४९.२३४ | |
| १४. | तन्निर्वर्त्यं विकार्यं तु... काष्ठादिसम्भवत्।। | ३.५०.२३४ | |
| १५. | क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।। दर्शनादनुमान्हा तत्प्राप्यमिति कथ्यते। | ३.५१.२३४ | |
| १६. | स्वातन्त्रञ्च - धात्वर्थव्यापारश्रयत्वम्। ... कर्त्तृ तेष्यते।। | | VBS 244 |
| १७. | क्रियायाः परिनिष्पत्तिर्यद् व्यापारादनन्तरम्। ... स्मृतम्। | ३.९०. | VBS 251 |
| १८. | वस्तुतस्तदनिर्देश्यं... दृश्यते यततः।। | तृ.का. ९१. | VBS 251 |
| १९. | कर्त्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम्। (साधन समुद्देश १४८) उपकुर्व्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।। | | VBS 258 |
| २०. | अपाये यदुदासीनं... मुच्यते।। | | VBS 262 |
| २१. | पततो ध्रुव... ध्रुवमुच्यते।। | | VBS 262 |
| २२. | उभावप्यध्रुवो...व्यवस्थिते।। | (तृ.का. साधनसमुदेश १४०) | VBS 262 |
| २३. | मेषान्तरक्रिया...पृथक् पृथक्।। | (तृ.का.सा. साधनसमुदेश १४१) | VBS 262 |
| २४. | निर्द्दिष्टविषयं किञ्चिद् ...उच्यते।। | तृ.का.सा. साधनसमुदेश | VBS 263 |

| | | | |
|---|---|---|---|
| | | १३६।। | |
| २५. | अनिशकरणात् कर्त्तुः... सम्प्रदानताम्।। | | VBS 273 |
| २६. | द्योतिका वाचिका वा स्युर्द्वित्वादीनां<br>विभक्तयः।। | | VBS 311 |
| २७. | शब्दस्तावच्छाब्दबोधे भासते।।<br>न सोऽस्ति प्रत्ययो लोके यः शब्दाऽनुगमादृते।। | वा.प्रकी.का.१५२. | VBS 320 |
| २८. | ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।<br>प्र.का. ५५.३२१.<br>तथैव सर्वशब्दानामेते पृथगवस्थिते।। इति<br>च।। ३२१ | | |
| २९. | ते साधुष्वनुमानेन...प्रकाशकाः।। | १.१४९. ४३१ | |
| ३०. | न शिष्टैरनुगम्यन्ते... साक्षादवाचकाः।। | १.१५०. ४३१ | |
| ३१. | अम्बाऽम्बेति यदा...भवति निर्णयः। | १. १७. ४३१ | |
| ३२. | एवं साधौ प्रयोक्तव्ये...प्रयुज्यते। | १.१५१. ४३१ | |
| ३३. | तेन साधुव्यवहितः...अभिधीयते।। | १ .१५२. ४३१ | |
| ३४. | पारम्पर्यादपभ्रंशा...साधुरवाचकः।। | १ .१५३. ४३१ | |
| ३५. | दैवी वाग् व्यवकीर्णे...बुद्धिविपर्य्ययः।। | १ .१५४. ४३१ | |
| ३६. | स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा। | | VBS 479 |
| ३७. | सम्बन्धभेदात् सत्तैव भिद्यमाना गवादिषु।<br>जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः।। | जाति. ३३. ४९६ | |
| ३८. | तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते।<br>सा नित्या सा महानात्मा तामाहुस्त्वलादयः।। | जाति. ३४.४९६ | |
| ३९. | यथौषधिरसाः सर्वे...तादृशीं विदुः।। | १००. ५१३ | |
| ४०. | भेदानां वा परित्यागात् ...वर्त्तते।। | १०१. ५१३ | |
| ४१. | अगृहीतविशेषेण यथा...गम्यते।। | १०२. ५१३ | |
| ४२. | प्रधानेतरयोर्यत्र...अनुरुद्धयते।। | ८१. ५२७ | |
| ४३. | प्रधानविषया...प्रतीयते।। | ८२. ५२७ | |

| | | | |
|---|---|---|---|
| ४४. | तदद्वारमपवर्गस्य... प्रकाशते।। | १४. ५८७ | |
| ४५. | इदमाद्यं पदस्थानं...राजपद्धतिः।। | १६. ५८७ | |
| ४६. | अत्रातीतविपर्यासः...अनुपश्यति।। | १७. ५८७ | |
| ४७. | शास्त्रेषु...ब्रह्म शाश्वतम्।। | द्वि.का. २३७. | VBS 607 |

## 4. Quotations from *Bhvādigaṇa*

| | | |
|---|---|---|
| १. | भू सत्तायाम्।। भ्वा गण।। | VBS 97, 330 |
| २. | आख्यातमाख्यातेन क्रिया सातत्ये। इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्। | VBS 430 |
| ३. | जहि कर्मणा बहुलमाभीक्षण्ये कर्त्ता रञ्चाभिदधाति। इति मयूरव्यंसकाद्यन्तर्गतसूत्रात्। | VBS 430-431 |

## 5. Quotations from *Nyāyaśāstra*

| | | | |
|---|---|---|---|
| १. | पर्वतो वह्निमान् धूमात् महानसवत्। | (K-18); NS | VBS 162 |
| २. | विभक्तौ न लक्षणा। | (K-24); | VBS 283 |

## 6. Quotations from *Mīmāṁsāsūtra*

| | | | |
|---|---|---|---|
| १. | अरुणया पिङ्गक्ष्यैकहायन्या सोमं क्रीणाति। | मी.सू. | VBS 40, 103, 391 |
| २. | स्वयुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्।। | | VBS P. 102 |
| ३. | सम्बन्धमात्रमुक्तञ्च श्रुत्या धात्वर्थभावयोः। तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते।। | | VBS 103 |
| ४. | 'गम्यमानक्रियामादाय कारकयोगः' इति भाट्टरीतिर्य | | VBS P. 116 |

| | | | |
|---|---|---|---|
| | क्तः | | |
| ५. | रथन्तरमुत्तराग्रन्थपठितऋक्ष्वेव गेयम्, नतु वेदे तदुत्तरपठ्यमानऋक्षु - इति नवमे निर्जीतम्। | | VBS 157 (Skt) & 161 (Hindi) |
| ६. | गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्। | जै.सू. ३.१.२२. | VBS 157 |
| ७. | पुंसां नेष्ठाभ्युपाय...।। | by मण्डनमिश्र | |
| ८. | प्रासनवन्मैत्रावरुणाय दण्डप्रदानम्। (मीमांसासूत्र अ.4 पा.2 अ.6) इत्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति। | | VBS 273 |
| ९. | जसादिषु छन्दसि वा वचनम्। | मी.सू. | VBS 311 |
| १०. | छागो वा मन्त्रवर्णात्। | मी.सू. | VBS 311 |
| ११. | छागस्य वपाया मेदसः। | मी.सू. | VBS 311 |
| १२. | वषट्कर्त्तुः पथममक्षः। | मीमांसादर्शन 3rd chapter. | |
| १३. | त्र्यङ्गैः स्विष्टकृतं यजति। | मीमांसादर्शन 10th chapter. | |
| १४. | उपेयप्रतिपत्त्यर्था। | | VBS 586 |

## 7. Quotations from *Brahmasūtra*

| | | | |
|---|---|---|---|
| १. | कर्म्मकर्तृव्यपदेशाद्य (ब्र.सू. १.२.४.) इति सूत्रे "मनोमयः प्राणशरीरः" - एनमितः प्रेत्याभिसम्भवितास्मि।। | | VBS 244; BS |
| २. | कर्त्ता शास्त्रार्थवत्त्वात् (ब्र.सू. २.३.३३.. इत्युत्तर) मीमांसाधिकरणे "शक्तिविपर्य्य यात्" इति सूत्रेणान्तः...। | | VBS 251 |
| ३. | तथा च तक्षोभयथा। | (ब्र.सू.२.६.८०.) | VBS 251 |

## 8. Quotations from *Vārikas* of Kātyāyana

| | | | |
|---|---|---|---|
| १. | सुपां कर्मादयोऽऽप्यर्थाः सङ्ख्या चैव तथा तिङाम्। प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा।। | | VBS 282 |
| २. | समानवाक्ये निघातयुष्मदस्मदादेशा। | K 16 | 146 |
| ३. | एकतिङ् वाक्यम्। | | P. 146 |
| ४. | गतिमतोदात्तवता तिङऽपि समासः। | (K 28) | 332 |
| ५. | क्विब्वचिप्रच्छयायतस्तुकरपुजुश्रीणां दीर्घश्च। | (K 28) | 332 |
| ६. | सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो न। इति | | 342 |
| ७. | निपातस्यानर्थकस्य। | | 475 |
| ८. | कृत्तद्धितसमासेभ्यः सम्वन्धाभिधानं भावप्रत्ययेनाऽन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्वन्धेभ्यः। | | VBS 489 |
| ९. | गुणवचनेभ्यो मतुपो लुगिष्टः।। | | VBS 489 |
| १०. | यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ। वा. तस्य भावस्त्वतलौ | | VBS 497 |

## 9. Quotations from *Upaniṣads*

| | | | |
|---|---|---|---|
| १. | तदेतेषां प्रणानां विज्ञानेन विज्ञानमादाय। | बृ. आ. २ ब्रा.। | VBS 251; |
| २. | आत्मैवेदं सर्वम्। | | VBS 606, |
| ३. | नामरूपो व्याकरवाणि। | | VBS 607 |
| ४. | अत्रायं पुरुषः स्वयं ज्योतिः। | | VBS 608 |
| ५. | तमेव भान्तमनुभाति सर्वम्। | | VBS 608 |
| ६. | तस्य भासा सर्वमिदं विभाति। | | VBS 608 |

## 10.Illustrative Sentences

| | | |
|---|---|---|
| १. | पश्य मृगो धावति। | VBS 138, 186 |
| २. | कण्ठैः पाक। | P. 138 |
| ३. | स्तोकं पचतीतिवत् स्तोकं पाकः। | P. 138, 144 |
| ४. | त्वं ब्रूहि देवदत्त। | P. 146 |
| ५. | भूतले न घट। | P. 147, 157 |
| ६. | नहि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिनभिक्षुके। | VBS 157 |
| ७. | कृतपूर्वी कटम्। | VBS 164 |
| ८. | चैत्रस्य नप्ता।<br>भोक्तुं पाकः।<br>भुक्त्वा पाक। | VBS 164 |
| ९. | द्वौ पाकौ। त्रयश्चत्वारः। | VBS 168 |
| १०. | सकृत् पाकः द्विस्त्रिश्चतुः पाकाः।<br>द्विर्वचनम्। | VBS 168 |
| ११. | आत्मास्ति & पर्वताः सन्ती। From महाभाष्य - इह भूतभविष्य | VBS P. 180 |
| १२. | तम आसीत्। तुच्छेनाभ्यपिहितं यदासीत्। अहमेकः प्रथममासम्। वर्त्तामि च भविष्यामि च।From Sruti | |
| १३. | अयं पपाच। | VBS P. 186 |
| १४. | व्यातेने किरणावलीमुदयनः। | VBS 186 |
| १५. | भवतु ते शिवप्रसादः। | VBS 192 |
| १६. | अस्य पुत्रोऽभवत्। | VBS 195 |
| १७. | यो ब्राह्मणायावगुरेतं शनेन यानयेत्। This is an example given under हेतुहेतुमर्तोलिङ् | VBS 196 |

| | | |
|---|---|---|
| १८. | चैत्रो ग्रामं गच्छति। | VBS 224 |
| १९. | गमयति कृष्णं गोकुलम्। | VBS 224, 227, 244 |
| २०. | चैत्रस्तण्डुलं पचति। | VBS 227, 227 |
| २१. | पाचयति कृष्णं गोपः। | 227 |
| २२. | घटं करोति। २३ काष्ठं भस्म करोति। २४ सुवर्ण कुण्डलं करोति। २५ घटं पश्यति। २६ तृणं स्पृशति। २७ विषं भुङ्क्ते। २८ गां दोग्धि। २९ क्रूरमभिक्रुध्यति। | 234 |
| २३. | स्थाली पचती। ३१ अग्निः पचति। ३२ एधांसि पचन्ति। ३३ तण्डुलः पच्यते। ३४ स कर्तेति। | 244 |
| २४. | मया हरिः सेव्यते। कार्यते हरिणा। | 244 |
| २५. | स्थाल्यां पचति। | 258 |
| २६. | भूतले वसति। | 258 |
| २७. | कटे शेने। | 258 |
| २८. | गुरौ वसति। | 258 |
| २९. | मोक्षे इच्छास्ति। | 258 |
| ३०. | तिलेषु तैलम्। | 258 |
| ३१. | धावतोऽश्वात् पतति। | 262 |
| ३२. | वृक्षाद् वस्त्रं पतति। | 262 |
| ३३. | वृक्षात् स्पन्दत। | 263 |
| ३४. | आसानाच्चालितं। | 263 |
| ३५. | वृक्षात् त्यजति। | 263 |
| ३६. | बलाहकाद् विद्योतत विद्युत। | 263 |
| ३७. | अश्वात् पतति। | 263 |
| ३८. | भवान् पाटलिपुत्रात्। | 263 |
| ३९. | राजकाय वस्त्रं ददाति। | 273 |
| ४०. | खण्डिकोपाध्यायः शिष्याय चपेटां ददाति। | 273 |

| | | |
|---|---|---|
| ४१. | सूर्यायार्घ्यं ददाति। | 273 |
| ४२. | विप्राय गां ददाति। | 273 |
| ४३. | उपाध्याय गां ददाति। | 273 |
| ४४. | प्राप्तोदकः। | 263, 366 |
| ४५. | देवदत्तस्य गौर्ब्राह्मणाय गेहाद् गङ्गायां हस्तेन मया दीयते। | VBS 282 |
| ४६. | घटं जानाति। | 282 |
| ४७. | नाऽनृतं वदेत्। | 283 |
| ४८. | कटपूः। | 332 |
| ४९. | आयतस्तूः। | 332 |
| ५०. | आयतस्तुः। | 336 |
| ५१. | दृन्भूः। | 336 |
| ५२. | काराभूः। | 336 |
| ५३. | वागर्थाविव। वार्गथः। | 336 |
| ५४. | ऋद्धस्य राजपुरुषः। | 342 |
| ५५. | राजपुरुषः सुन्दरः। | 513 |
| ५६. | राजपुरुषः देवदत्तस्य च। | 342 |
| ५७. | वर्षासु रथकारोऽग्निमादधीत। | 348 |
| ५८. | राज्ञः पुरुषः राजपुरुषः। | 348, 366, 384, 385 राजापुरुष। 348 |
| ५९. | देवदत्तः पच्यते। | 355 |
| ६०. | चित्रगुः। | 355, 366, 384 |
| ६१. | चित्रगुमानय। | 378 |
| ६२. | पङ्कजमानय। | 378 |
| ६३. | दण्डिनं पश्य। | 378 |
| ६४. | शूलिनं पूजय। | 378 |
| ६५. | अघटमानय। | 379 |
| ६६. | पाकान्नीलः। | 379 |

| | | |
|---|---|---|
| ६७. | धर्मात् सुखी। | 379 |
| ६८. | गामानयति कृष्णो दण्डेन। | 379 |
| ६९. | नीलोत्पलम्। | 384 |
| ७०. | तण्डुलः पचति। | 384, 465 |
| ७१. | तण्डुलः शुभ्रः। | 384, 465 |
| ७२. | शुभ्रेण तण्डुलेन। | 384 |
| ७३. | आक्षिकः। | 394 |
| ७४. | कुम्भकारः। | 394 |
| ७५. | अक्षैर्दीव्यति। | 394 |
| ७६. | कुम्भं करोति। | 394 |
| ७७. | चित्रा गावो यस्य। | 395 |
| ७८. | यष्टीः प्रवेशय। (Example of लक्षणा) | 397 |
| ७९. | गङ्गायां घोषः। | 417 |
| ८०. | ब्राह्मणाय देहि। ब्राह्मणं देहि। | 432 |
| ८१. | घटो नास्ति। | 443, 469 |
| ८२. | अब्राह्मणः, अपापम्, अनश्च, अनुदरा, कन्या, अपशवो वा। | 443, 450 |
| ८३. | अत्वं भवसि। | 450 |
| ८४. | अनहं भवामि। | 450 |
| ८५. | असः शिवः। | 450 |
| ८६. | सेव्यतेऽनेकया। | 451 |
| ८७. | पतन्त्यनेके जलधेरिवोर्मयः। | 451 |
| ८८. | उपास्येते हरिहरौ। | 462 |
| ८९. | साक्षात्क्रियते। | 465 |
| ९०. | अलङ्क्रियते। | 465 |
| ९१. | ऊरीक्रियते। | 465 |
| ९२. | वायुर्विकुरुते। | 465 |
| ९३. | सैन्धवा विकुर्व्वते। | 465 |

| | | |
|---|---|---|
| ९४. | भूयान् प्रकर्षः। | 465 |
| ९५. | कीदृशो निश्चय। | 465 |
| ९६. | शोभनः समुच्चयः। | 466 |
| ९७. | धवखदिर। | 466 |
| ९८. | राजपुरुषत्वम्। | 489 |
| ९९. | औपगवत्वम्। | 489 |
| १००. | पक्तृत्वम्। | 489 |
| १०१. | दामोदरत्वम्। | 489 |
| १०२. | कृष्णसर्पत्वम्। | 489 |
| १०३. | दामोदरत्वम्। | 493 |
| १०४. | घटत्वम्। | 493, 496 |
| १०५. | ऐन्द्रं दधि। | 506 |
| १०६. | ग्रहं संमार्ष्टि। | 520 |
| १०७. | सुदध्युपास्य। | 520 |
| १०८. | भोक्तुं पचति। | 526 |
| १०९. | भुक्तं व्रजति। | 526 |
| ११०. | भुक्त्वा तृप्तः। | 526 |
| १११. | अधीत्य तिष्ठति। | 526 |
| ११२. | मुखं व्यादाय स्वपिति। | 526 |
| ११३. | ओदनं पक्त्वाऽहं भोक्ष्ये। | 526 |
| ११४. | प्रासादे आस्ते। | 527 |
| ११५. | पक्त्वौदनो मया भुज्यते। | 527 |
| ११६. | देवदत्तः पचमानः। | 550 |
| ११७. | पचतितरां मैत्रः। | 550 |
| ११८. | पचतिकल्पं मैत्र। | 550 |
| ११९. | रामोऽस्ति। | 552 |
| १२०. | घटमानय। | 558 |

## 11.Quotations from *Niruktam* of Yāska

| | | |
|---|---|---|
| १. | भावप्रधानम् आख्यातं सत्त्वप्रधानानि नामानि। | (नि.अ.१ ख.१) P. 103 |

## 12.Literary Works

| | | | |
|---|---|---|---|
| १. | क्रमादमुं नरद इत्याबोधि...। | शिशुपालवधम्। P.73 | |
| २. | रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभवद्। | (रामायणम्) P. 129 | |
| ३. | वागर्थाविव सम्पृक्तौ। पार्वती परमेश्वरौ वन्दे। | (कुमारसम्भवम्) P.471 | |
| ४. | बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः।। | काव्यप्रकाश | VBS 603 |
| ५. | असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः। | | VBS 606 |

## 13. Miscellaneous

| | | | |
|---|---|---|---|
| १. | आनन्त्येऽपि हि भावानामेकं... व्यभिचारिष्यति।। तन्त्रवा. १ पा. ३ अधि.।। | | |
| २. | पश्वाऽनतायुं गुहा चरन्तं" इत्यादिवेददर्शनाद्य। | | VBS 310 |
| ३. | पश्वे नृभ्यो यथा गवे। इत्यादिवेददर्शनाद्य। | | VBS 310 |
| ४. | अपदं न प्रयुञ्जीत। | | VBS 330 (May be from |

| | | | |
|---|---|---|---|
| | | | Paniniya shiksha) |
| ५. | प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यम्। इति व्युत्पत्तेः। | | VBS 355 |
| ६. | साक्षात्प्रत्यक्षतुल्ययोः। इति कोशस्वरसात्। | | 465 |
| ७. | चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः। | तंत्रवा.अ.१.पा.३ | 475 |
| ८. | क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः। | तंत्रवा. आ.१.पा.३ | 475 |
| ९. | तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।<br>तदर्थद्योतकौ तौ तु वाचकः स विचार्य्यते।। | तंत्रवा. आ.१.पा.३ | 475 |
| १०. | उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते।<br>प्रहाराहारसंहारविहारपरिहारवदिति।। | 475 | |
| ११. | यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः।<br>तदा गत्यन्तराभावात् सम्बन्धो वाच्य आश्रितः।। | तंत्रवा. आ.३.पा.१ | VBS 493 |
| १२. | आमिक्षां देवतायुक्तां ... विषयार्पणम्।। | तंत्रवा. अ.२.पा.१ | 504 |
| १३. | केवलाद्देवतावाची... प्रतिपादयितुं श्रमः।। | तंत्रवा. आ.२.पा.१ | 504 |
| १४. | उत्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि।<br>तदा सर्वैर्विशिष्येत द्वन्द्वोत्पन्नसुबर्थवत्।। | अ.२.पा.२ अधि.१<br>पृ.११२. शास्त्रदीपिका<br>पार्थसारथि | VBS 520 |
| १५. | मृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान्। स उवाच अन्नम्।। | भृगुवल्लि। | VBS 586 |
| १६. | ब्रह्मपुच्छं प्रतिष्ठा। | | VBS 586 |

# APPENDIX - II

## ॥ वैयाकरणभूषणकारिका ॥[1]

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।

तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥१॥

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।

फले प्रधानं व्यापारस्तिङ्गर्थस्तु विशेषणम् ॥२॥

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।

व्यापारे शप्शनमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ॥३॥

उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्ययात् ।

तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ॥४॥

व्यापारो भावना सैवोत्पादना सैव च क्रिया ।

कृञोऽकर्मकताऽऽपत्तेर्न हि यत्नोऽर्थ इष्यते ॥५॥

किन्तूत्पादनमेवातः कर्मवत् स्याद्यगाद्यपि।

कर्मकर्तर्यन्यथा तु न भवेद् तद्दृशेरिव ॥६॥

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते।

न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः ॥७॥

---

[1] The source of this text of *VBK* is the appendix of the *Bhaṭṭoji Dīkṣita: His Contribution to Sanskrit Grammar,* by Bali Suryakanta. According to his opinion, the missing number of the *Kārikās* originally belongs to *VP* and they were affixed by Kauṇḍabhaṭṭa in *VBS*. His opinion is absolutely correct. All these missing *Kārikās* are found in *VP* with some variations of writing. The variations are shown at the footnotes of the respective *Kārikās* in the previous appendix i.e. in the text of *VBS*. The missing Kārikās are – 14, 15, 19, 35, 37, 38, 39 & 73.

तस्मात्करोतिर्धातोः स्याद्व्याख्यानं न त्वसौ तिङाम् ।

पक्ववान्कृतवान्पाकं किं कृतं पक्वमित्यपि ॥८॥

किं कार्यं पचनीयञ्चेत्यादि दृष्टं हि कृत्स्वपि।

किञ्च क्रियावाचकतां विना धातुत्वमेव न ॥९॥

सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः ।

न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम् ॥१०॥

धात्वर्थत्वं क्रियात्वं चेद्धातुत्वं च क्रियार्थता ।

अन्योन्यसंश्रयः स्पष्टस्तमादस्तु यथाकरम् ॥११॥

अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना ।

अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥१२॥

फलव्यापारयोरेकनिष्ठतायामकर्मकः।

धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥१३॥

सम्बोधनान्तं कृत्वोर्थाः कारकं प्रथमो वतिः।

धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ् ॥१४॥

तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्।

साधुत्वमष्टकस्याऽस्य क्रिययैवावधार्यताम् ॥१६॥

यदि पक्षेऽपि वत्यर्थः कारकञ्च नञादिषु ।

अन्वेति त्यज्यतां तर्हि चतुर्थ्याः स्पृहिकल्पना ॥१७॥

कृत्वोर्थाः क्त्वातुमुन्वत्स्युरिति चेत् सन्ति हि क्वचित् ।

अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाऽऽश्रयात् ॥२०॥

भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम् ।

साधुत्वं तदभावेऽपि बोधो नेह निवार्यते ॥१८॥

वर्त्तमाने परोऽक्षे श्वो भाविन्यथ भविष्यति ।

विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः ॥१९॥

ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः ।

सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ्स्मृतः ॥२०॥

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।

यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ॥२१॥

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।

नामार्थ इति सर्वेऽमि पक्षाः शास्त्रे निरूपिताः ॥२२॥

शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा ।

नोचेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थो व भासते ॥२३॥

अत एव गवित्याह भू सत्तायामितीदृशम् ।

न प्रातिपदिकं नापि पदं साधु तु तत्स्मृतम् ॥२४॥

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा ।

सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः ॥२५॥

समासस्तु चतुर्धेति प्रायोवादस्तथा परः ।

योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च ॥२६॥

भौतपूर्व्यात्सोऽपि रेखागवयादिवदास्थितः ॥

जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ॥२७॥

भेदः संसर्ग उभयं चेति वाच्यव्यवस्थितेः ।

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ॥२८॥

बहूनां वृत्तिधर्माणां वचनैरेव साधने

स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः ॥२९॥

चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम् ।

कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः ॥३०॥

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना ।

क्लृप्तत्यागश्चास्ति तव तत्किं शक्तिं न कल्पयेः ॥३१॥

पर्यवस्यच्छाब्दबोधाविदूरप्राक्क्षणस्थितेः ।

शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम् ॥३२॥

नञ्समासे चापरस्य प्राधान्यात्सर्वनामता ।

आरोपितत्वं नञ्द्योत्यं न ह्यसोऽप्यतिसर्ववत् ॥३३॥

अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् ।

विशेषणं  विशेष्यो वा न्यायतस्त्ववधार्यताम् ॥३४॥

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा ।

उपास्येते हरिहरौ लकारो दृश्यते यथा ॥३५॥

तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः ।

विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः ॥३६॥

पदार्थः सदृशान्वेति विभागेन कदापि न ।

निपातेतरसंकोचे प्रमाणं किं विभावय  ॥३७॥

शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ।

इत्यादावन्वयो न स्यात्सुपां च श्रवणं ततः  ॥३८॥

नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता ।

द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः  ॥३९॥

निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।

युक्तं वा न तु तद्युक्तं परेषां मतमेव नः  ॥ ४०॥

निपातत्वं परेषां यत्तदस्माकमिति स्थितिः ।

व्यापकत्वाच्छक्ततायास्त्ववच्छेदकमिष्यते  ॥४१॥

कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम् ।

त्वतलोरर्थकथनं टीकायां हरिणा कृतम् ॥४२॥

अत्रार्धजरतीयं स्याद्दर्शनान्तरगामिनाम् ।

सिद्धान्ते तु स्थितं पक्षद्वयं त्वादिषु तच्छृणु ॥४३॥

प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारताम् ।

धर्ममात्रं वाच्यमिति यद्वा शब्दपरा अमी ॥४४॥

जायन्ते तज्जन्यबोधप्रकारे भावसंज्ञेति ।

प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् ॥४५॥

अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः ।

देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा ॥४६॥

प्रदेय एव वा शक्तिः प्रकृतेर्वास्तु लक्षणा ।

देवतायां निरूढेति सर्वे पक्षा अमी स्थिताः ॥४७॥

क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता ।

वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते ॥४८॥

अभेदैकत्वसङ्ख्याया वृत्तौ भानमिति स्थितिः ।

कपिञ्चलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते ॥४९॥

लक्ष्यानुरोधात्संख्यायास्तन्त्रातन्त्रे मते यतः ।

पश्वेकत्वादिहेतूनामाश्रयणमनाकरम् ॥५०॥

विधेये भेदकं तन्त्रमन्यतो नियमो न हि ।

ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम् ।।५१।।

रदाभ्यां वाक्यभेदेन नकारद्वयलाभतः ।

क्षतिर्नैवास्ति तन्त्रत्वे विधेये भेदकस्य तु ।।५२।।

अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः ।

समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः ।।५३।।

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मनस्थितिः ।

साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः ।।५४।।

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा ।

किं चाऽऽख्यातेन शत्राद्यैर्लडेव स्मार्यते यदि ।।५५।।

कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय ।

तरबाद्यन्ततिङ्क्ष्वस्ति नामता कृत्स्विव स्फुटा ।५६।।

नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्य्यताम् ।।

अथादेशा वाचकाश्चेत्पदस्फोटस्ततः स्फुटः ।।५७।।

घटेनेत्यादिषु न हि प्रकृत्यादिभिदा स्थिता ।

वस्नसादाविवेहापि संप्रमोहो हि दृश्यते ।।५८।।

हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु ।

अर्थे विशिष्य सम्बन्धाग्रहणं चेत्समं पदे ।

लक्षणादधुना चेत्तत्पदेऽर्थेऽप्यस्तु तत्तथा ।।५९।।

सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः ।

भाट्टास्तेऽपीत्थमेवाऽऽहुर्लक्षणाया ग्रहे गतिम् ॥६०॥

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।

वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥६१॥

पञ्चकोशादिवत्तस्मात्कल्पनैषा समाश्रिता ।

उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ॥६२॥

कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि ।

स्वरदैर्घ्याद्यपि ह्यन्ये वर्णेभ्योऽन्यस्य मन्वते ॥६३॥

शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम् ।

औपाधिको वा भेदास्तु वर्णानां तारमन्दवत् ॥६४॥

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।

कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥६५॥

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।

ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ॥६६॥

**********

# APPENDIX - III

श्रीकौण्टभट्टविरचितः

# वैयाकरणभूषणसारः

**श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।**

**स्फोटरूपं यतः सर्वं जगदेतद् विवर्तते ॥१॥**

**अशेषफलदातारं भवाब्धितरणे तरिम्।**

**शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम्॥२॥**

**वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा।**

**भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये॥३॥**

**पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधं**

**द्वैतध्वान्तनिवारणादिफलिकां पुम्भाववाग्देवताम्।**

**ढुण्ढिं गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्**

**सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये॥४॥**

**नत्वा गणेशपादाब्जं गुरूनथ सरस्वतीम्।**

**श्रीकौण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम् ॥५॥**

**फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।**

**तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥१॥**

उद्धृतः इति। अत्र 'अस्माभिः' इति शेषः। **'भाष्याब्धेः शब्दकौस्तुभ उद्धृतः '** इत्युक्तिस्तु शब्दकौस्तुभोक्तानामाधुनिकोत्प्रक्षितत्वनिरासाय । अन्यथा तन्मूलस्यास्य ग्रन्थस्याप्याधुनिकोत्प्रक्षितसारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः। 'तत्र निर्णीतः ' इत्युक्तिरितोऽप्यधिकजिज्ञासुभिः **शब्दकौस्तुभे** द्रष्टव्यमिति ध्वनयितुम् ।
प्रतिज्ञातमाह -

**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।**
**फले प्रधानं व्यापारस्तिङ्गर्थस्तु विशेषणम् ॥२॥**

धातुरित्यत्र स्मृत इति वचनविपरिणामेनान्वयः। फलं विक्लित्यादि । व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया। उक्तञ्च **वाक्यपदीये-**

**"यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।**

**आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥"**

न च साध्यत्वेनाभिधाने मानाभावः, 'पचति, पाकः'; 'करोति, कृतिः'- इत्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानत्वात्। तथाच क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यत्वम्। तद्रूपवत्त्वमसत्त्वभूतत्वम्। एतदेवादाय-

**"असत्त्वभूतो भावाश्च तिङ्पदैरभिधीयते"** इति वाक्यपदीयमिति द्रष्टव्यम्।

अयं च व्यापारः फूत्कारत्वाधःसन्तापनत्वयत्नत्वादितत्तद्रूपेण वाच्यः। पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात्। न च नानार्थतापत्तिः। तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेकानामनुगमकस्य सत्त्वात्। आख्याते क्रियैकत्वव्यवस्थाऽप्यवच्छेकं बुद्धिविशेषैक्यमादायैव। उक्तञ्च वाक्यपदीये -

**"गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।**

**बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते "** ॥ इति॥

धात्वर्थं निरूप्य तिङ्गर्थमाह - आश्रये त्विति। फलाश्रये व्यापाराश्रये चेत्यर्थः। फलाश्रयः कर्म, व्यापाराश्रयः कर्ता। तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङ्गस्तदंशे शक्तिरन्यलभ्यत्वात्। शक्यतावच्छेकं चाश्रयत्वं तत्तच्छक्तिविशेषरूपमिति सुबर्थनिर्णये वक्ष्यते। अत्रोच्यते – **'लः कर्मणि च भावे चाऽकर्मकेभ्यः'** (पा°सू° ३.४.६९) इति सूत्रमेव मानम्। अत्र हि चकारात् **'कर्तरि कृत्'** (पा°सू° ३.४.६७) इति सूत्रोक्तं 'कर्तरि' इत्यनुकृष्यते। बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्त्तरि चानेन विधीयन्ते। नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकताशक्तिमादाय शसादिविधानवत्। न च सुत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे तथा च कर्तृत्वं कृतिः, कर्मत्वञ्च फलमेवार्थोऽस्त्विति शङ्क्यम्, फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य पुनस्तत्र शक्तिकल्पनायोगात्। अथ दर्शानान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लकारविधिः स्यादिति चेत्तर्हि कृतामपि कर्तृकर्मादिवाचित्वं न सिध्येत्। **'कर्त्तरि कृत्'** (पा°सू° ३.४.६७) इति च **'लः कर्मणि·'** (पा°सू° ३.४.६९) इत्यनेन तुल्ययोगक्षेमम्। अपिच मीमांसकानां

कृतामिवाख्यातानामपि कर्तृवाचित्वमस्तु, भावनाया एवाक्षेपेण कृदादिवत् प्रतीतिसम्भवे वाच्यत्वं माऽस्तु। तथा सति प्राधान्यं तस्या न स्यादिति चेन्न। 'घटमानय' इत्यादावाक्षिप्तव्यक्तेरपि प्राधान्यवदुपपत्तेः। 'पचति' इत्यादौ 'पाकं करोति' इति भावनाया विवरणदर्शनाद्वाच्यत्वमिति चेन्न, पाकानुकूलव्यापारवतः कर्त्तुरपि विवरणविषयत्वाविशेषात्। न च कर्त्तुर्विवरणं तात्पर्यार्थविवरणम्, 'पाकं करोति' इत्यशब्दार्थकर्मत्वविवरणवदितरेतरयोगद्वन्द्वे समुच्चयाशविवरणवद् वा न तदर्थनिर्णायकमिति वाच्यम्। भावनायामपि तुल्यत्वात्। किञ्च पचति देवदत्त इत्यत्राऽभेदान्वयदर्शनात्तदनुरोधेन कर्त्तुर्वाच्यत्वमावश्यकं पक्ता देवदत्तः इतिवत्। न चाभेदबोधे समानविभक्तिकत्वं नियामकं तच्चात्र नास्तीति वाच्यम्। सोमेन यजेत, स्तोकं पचति, राजपुरुष इत्यादावप्यभेदबोधानापत्तेः। न च लक्षणया कर्त्तुरुक्तत्वात्समानाधिकरण्यं पिङ्गाक्ष्यादियौगिकानामपि द्रव्यवाचित्वानापत्तेः। एवं 'वैश्वदेवी'त्यादितद्धितानामपि। **'अनेकमन्यपदार्थे'** (पा°सू° २.२.२४) **'साऽस्यदेवता'** (पा°सू° ४.२.२४) इत्यनुशासनेन, 'पिङ्गे अक्षिणी यस्याः' 'विश्वे देवा देवता अस्याः' इति विग्रहदर्शनात् प्रधानषष्ठ्यर्थे एवाऽनुशासनलाभात्। तथाच **"अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति"** (तै°स°का°१ य°२ अ°१०) इति वाक्ये द्रव्याऽनुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्य एवान्वयप्रतिपादकारुणाधिकरणोच्छेदापत्तिः। द्रव्यवाचकत्वसाधकमूलयुक्तेः समानाधिकरण्य-स्योक्तरीत्योपपत्तेरिति प्रपञ्चितं विस्तरेण **वैयाकरणभूषणे**। तिङ इति। बोधकतारूपा शक्तिस्तिङ्क्ष्वेवेत्यभिप्रेत्येदम्। पदार्थं निरूप्य वाक्यार्थं निरूपयति- फले इत्यादि। विक्लित्यादि फलं प्रति तिङर्थः कर्तृकर्मसङ्ख्याकालाः। तत्र कर्तृकर्मणी फलव्यापारयोर्विशेषणे। सङ्ख्या कर्तृप्रत्यये कर्त्तरि। कर्मप्रत्यये कर्मणि। समानप्रत्ययोपात्तत्वात्। तथाचाऽऽख्यातार्थ-सङ्ख्याप्रकारकबोधं प्रत्याख्यातजन्यकर्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावः फलितः। नैयायिकादीनामाख्यातार्थसङ्ख्यायाः प्रथमान्तार्थ एवान्वयादाख्यातार्थ-सङ्ख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावो वाच्यः, सोऽपि 'चन्द्र इव मुखं दृश्यते' देवदत्तो भुक्त्वा व्रजतीत्यादौ चन्द्रक्त्वार्थयोराख्यातार्थनन्वयादितराविशेषणत्वघटित इत्यतिगौरवम्। इदमपि कर्तृकर्मणोराखायतार्थत्वे मानमिति स्पष्टं **बृहद्भूषणे**। कालस्तु व्यापारे विशेषणम्। तथाहि – **'वर्त्तमाने लट्'** (पा°सू° ३.२.१२३) इत्यत्राधिकाराद्धातोरिति लब्धम्। तच्च धात्वर्थं वदत्प्राधान्याद्व्यापारमेव ग्राह्यतीति तत्रैव तदन्वयः। न च सङ्ख्यावत्कर्तृकर्मणोरेवान्वयः शङ्क्यः। अतीतभावनाके कर्त्तरि 'पचति' इत्यापत्तेः। 'अपाक्षीत्' इत्यनापत्तेश्च। पाकानारम्भदशायां कर्तृसत्त्वे 'पक्ष्यति' इत्यनापत्तेश्च। नापि फले तदन्वयः, फलानुत्पत्तिदशायां व्यापारसत्त्वे 'पचति' इत्यनापत्तेः। 'पक्ष्यति' इत्यापत्तेश्चेत्यवधेयम्। न चाऽऽमवातजडीकृतकलेवरस्योत्थानानुकूलयत्नसत्त्वाद् 'उत्तिष्ठति' इति प्रयोगापत्तिः।

परयत्नस्याज्ञानादाप्रयोगात्। किञ्चिच्चेष्टादिनाऽवगतौ च 'अयम् उत्तिष्ठति, शक्त्यभावात्फलं तु न जायते' इति लोकप्रतीतेरिष्टत्वात्। एवं च तिङर्थो विशेषणमेव। भावनैव प्रधानम्। यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं तथापि **'भावप्रधानम् आख्यातं, सत्त्वप्रधानानि' (निरुक्ते, अ.१ खं.१)** इति निरुक्ताद् भूवादिसूत्रादिस्थक्रिया-प्राधान्यबोधकभाष्याभ्यां धात्वर्थभावनाप्राधान्यमध्यवसीयते। अपि चाख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात्प्रथमान्तस्य प्राधान्यापत्तिः। तथाच 'पश्य मृगो धावति' इत्यत्र भाष्यसिद्धैकवाक्यता न स्यात्। प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः। नचैवमप्रथमासामानाधिकरण्याच्छतृप्रसङ्गः। एवमपि द्वितीयाया दुर्वारत्वेन 'पश्य मृगः' इत्यादि वाक्यस्यैवाऽसम्भवापत्तेः। न च 'पश्य' इत्यत्र 'तम्' इति कर्माध्याहार्यं वाक्यभेदप्रसङ्गात्। उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयाऽन्वयस्य प्रतिपिपादयिषितत्वात्। अध्याहारेऽनन्वयापत्तेश्च। एवञ्च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नाऽऽदरणीयम्। किन्तु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्यकारणभावो द्रष्टव्यः। भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवद् धात्वर्थभावनोपस्थितिरपि हेतुः, 'पश्य मृगो धावति' 'पचति भवति' इत्याद्यनुरोधादिति दिक्। इत्थञ्च 'पचति' इत्यत्रैकाश्रयिका पाकानुकूला भावना, 'पच्यते' इत्यत्रैकाश्रयिका या विक्लितिस्तदनुकूला भावनेति बोधः। देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभि-स्तदर्थस्याभेदान्वयः। 'घटो नश्यति' इत्यत्रापि घटाभिन्नाश्रयको नाशानुकूलो व्यापार इति बोधः। स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानम्। अत एव तस्यां सत्यां 'नश्यति', तदत्यये 'नष्टः', तद्भावित्वे 'नङ्क्ष्यति' इति प्रयोगः। 'देवदत्तो जानाति, इच्छति' इत्यादौ च देवदत्ताभिन्नाश्रयको ज्ञानेच्छाद्यनुकूलो वर्त्तमानो व्यापार इति बोधः। स चान्तत आश्रयतैवेतिरीत्योह्यम्॥२॥

नन्वाख्यातस्य कर्तृकर्मशक्यत्वे 'पचति' इत्यत्रोभयबोधापत्तिः, कर्तुमात्रबोधवत्कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह -

**फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।**

**व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम्॥३॥**

तङादयः फले आश्रयान्वयं द्योत्यन्ति। फलान्वय्याश्रयस्य कर्मत्वात्तद्द्योतकाः कर्मद्योतकाः, व्यापारान्वय्याश्रयस्य कर्तृत्वात्तद्द्योतकाः कर्तृद्योतका इति समुदायार्थः। द्योतयन्ति तात्पर्यं ग्राहयन्ति॥३॥

नन्वेवं **'क्रमादमुं नारद इत्यबोधि सः'** (**शिशुपालवधे १.३**) 'पच्यते ओदनः स्वयमेव' इत्यादौ च व्यभिचारः। कर्मणः कर्तृत्वविवक्षायां कर्त्तरि लकारे सति **'कर्मवत् कर्मणा तुल्यक्रियः'** (पा°सू° ३.१.८७) इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटा-मतिदेशाद्यगादिसत्त्वेऽपि कर्त्तुरेव बोधाद्, व्यापार एवाऽऽश्रयान्वयाच्च। 'अबोधि' इत्यत्रापि बुध्यतेः कर्त्तरि लुङ् च्लिः । तस्य **'दीपजन॰'** (पा°सू° ३ .१.६१) इति चिण्, **'चिणो लुक्'** ( पा°सू° ६ .४.१०४) इति तस्य लुगिति साधनादित्याशङ्कायामाह -

**उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्ययात्।**

**तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ॥४॥**

कर्मकर्तृविषयादौ – 'पच्यते ओदनः स्वयमेव' इत्यादौ। अत्र हि 'एकौदनाभिन्नाश्रयकः पाकानुकूलो व्यापारः' इति बोधः। क्रमादित्यादिपदग्राह्यम्। अत्र 'सामान्यविशेषज्ञानपूर्वक एकनारदविषयकज्ञानानुकूलः कृष्णाभिन्नाश्रयकोऽतीतो व्यापारः' इति बोधः। यथोचितमिति। सकर्मकधातुसमभिव्याहृत-भावसाधारणविधिविधेयचिण्यगादि कर्मद्योतकमिति भावः ॥४॥

एवं **सूचीकटाहन्यायेन** सोपपत्तिकं वाक्यार्थमुपवर्ण्य 'फलव्यापारयोः' इति प्रतिज्ञातं धातोर्व्यापारवाचित्वं लडाद्यन्ते भावनाया अवाच्यत्वं वदतः प्रभाकरादीन्प्रति व्यवस्थापयति -

**व्यापारो भावना सैवोत्पादना सैव च क्रिया।**

**कृञोऽकर्मकताऽऽपत्तेर्न हि यत्नोऽर्थ इष्यते ॥५॥**

पचति पाकमुत्पादयति, पाकानुकूला भावना, तादृश्युत्पादना इत्यादिविवरणाद् विक्रियमाणस्यापि तद्वाचकतेति भावः। व्यापारपदं फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम्। अत एव 'पचति' इत्यत्र अधःसन्तापनत्वफूत्कारत्वचुल्ल्युपरिधारणत्वयत्नत्वादिभिर्बोधः सर्वसिद्धः। न चैवमेषां शक्यतावच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम्, 'रथो गच्छति', 'जानाति' इत्यादौ च व्यापारादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः साध्वी। शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववद् गुरुणि सम्भवात्। तयोर्वैषम्ये बीजाभावात्।

न च 'पचति – पाकं करोति' इति यत्नार्थककरोतिना विवरणाद् यत्न एवाऽऽख्यातार्थ इति वाच्यं, 'रथो गमनं करोति' 'बीजादिनाऽङ्कुरः कृतः' इति दर्शनात् कृञो यत्नार्थकताया असिद्धेः।

किञ्च भावनाया अवाच्यत्वे 'घटं भावयति' इत्यत्रेव 'घटो भवति' इत्यत्रात्रि द्वितीया स्यात् । न चात्र घटस्य कर्तृत्वेन तत्सञ्ज्ञा कर्मसञ्ज्ञया बाधान्न द्वितीयेति वाच्यम् । अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वेन घटस्याकर्तृत्वात् । कृत्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात् ।

धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात् । अपि च भावनाया अवाच्यत्वे धातूनां सकर्मकत्वाकर्मकत्वविभाग उच्छिन्नः स्यात् । स्वार्थफलव्यधिकरणव्यापारवाचिकत्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावनाया वाच्यत्वमन्तरेणासम्भवि । अन्यतमत्वं तत्त्वमिति चेत् ? न । एकस्यैवार्थभेदेनाकर्मकत्वसकर्मकत्वदर्शनात्। तदेतदभिसन्धायाह — कृञ इति ।

अयम्भावः - व्यापाराऽवाच्यत्वपक्षे फलमात्रमर्थ इति फलितम् । तथाच 'करोति' इत्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम् । तथा च 'यति प्रयत्ने' इतिवत् फलस्थानीययत्नवाचकत्वाविशेषादकर्मकतापत्तिरुक्तरीत्या दुर्वारेति । तथा च - 'न हि यत्नः' इत्यत्र फलस्थानीयत्वेनेति शेषः । 'कृञः' इति धातुमात्रोपलक्षणम् । सर्वेषामप्यकर्मकता सकर्मकता वा स्यादिति भावः । अथवा 'व्यापारो भावना' इत्यर्धेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत्साधयन्नैयायिकाभ्युपगतं जानाति करोत्यादेः केवलज्ञानयत्नादिक्रियामात्रवाचित्वं दूषयति - कृञ इति। अयम्भावः-फलांशस्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात्, तथाच स्वार्थफलव्यधिकरणव्यापारवाचित्वादिरूपसकर्मकत्वोच्छेदापत्तिः। न च कृञादौ सकर्मकत्वव्यवहारो भाक्त इति नैयायिकोक्तं युक्तम् । व्यवहारस्य भाक्तत्वेऽपि कर्मणि लकारासम्भवात् । न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादि कार्यं कर्त्तुं शक्यम् । एवञ्च 'न हि यत्न' इत्यत्र यत्नमात्रमित्यर्थः ॥५॥

**किन्तूत्पादनमेवातः कर्मवत् स्याद्यगाद्यपि।**

**कर्मकर्तर्यन्यथा तु न भवेद् तद्दृशेरिव ॥६॥**

उत्पादनमुत्पत्तिरूपफलसहितं यत्नादि कृञर्थ इत्यर्थः । फलस्य वाच्यत्वे युक्त्यन्तरमाह - अत इत्यादि । यतः कृञो यत्नमात्रमर्थो नेष्यते, अतः कर्मवत् स्यादिति पदेन **'कर्मवत् कर्मणा तुल्यक्रियः'** (पा० सू० ३.१.८७) इति सूत्रं लक्ष्यते । अयमर्थः – यत् एतस्योत्पादनार्थकताऽतः 'पच्यते ओदनः स्वयमेव' इतिवत् 'क्रियते घटः स्वयमेव' इति यगादयोऽप्युपपद्यन्ते । अन्यथा यत्नस्य कर्मनिष्ठत्वाभावात् तन्न स्याद् दृशिवत् । यथा 'दृश्यते घटः स्वयमेव' इति न, दर्शनस्य घटावृत्तित्वात् तथा यत्नस्यापीति प्रयोगानापत्तेरिति ॥६॥

नन्वेवं कृञादेरिव 'जानाति' इत्यादेरपि विषयावच्छिन्नावरणभङ्गादि-फलवाचित्वमावश्यकम्। अन्यथा सकर्मकतानापत्तेः। तथा च 'ज्ञायते घटः स्वयमेव' इति किं न स्यात्। एवं 'ग्रामो गम्यते स्वयमेव' इत्याद्यपि – इत्याशङ्कां मनसि कृत्याऽऽह -

**निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते।**

**न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः ॥७॥**

ईप्सितं कर्म त्रिविधम् – निर्वर्त्यं विकार्यं प्राप्यञ्च । तत्राद्योः कर्मवद्भावो नाऽन्त्ये। प्राप्यत्वञ्च क्रियाकृतविशेषानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते। न हि - 'अयं घटः केनचिद् दृष्टो, ग्रामोऽयं केनचिद् गतः' इति शक्यं कर्मदर्शनेनावगन्तुम्। 'घटं करोति' इति निर्वर्त्ये 'सोमं सुनोति' इति विकार्ये च तज्ज्ञातुं शक्यमिति न तत् प्राप्यम्। तथाच घटादेर्दृश्यादौ प्राप्यकर्मत्वान्नोक्ताऽतिप्रसङ्ग इति भावः। धातूनां फलावाचकत्वे त्यजिगम्योः पर्यायितापत्तिः, क्रियावाचकत्वाविशेषात्। फलस्योपलक्षणत्वेऽप्येकक्रियाया एव पूर्वदेशविभागोत्तरदेशसंयोग-जनकत्वाद् उक्तदोषतादवस्थ्यमित्यपि वदन्ति। तस्मादावश्यकं सकर्मकाणां फलवाचकत्वम्। अकर्मकाणान्तु तन्निर्विवादमेव, **'भू सत्तायम्'** (भ्वा० ग०) इत्याद्यनुशासनाच्च। अत एव **'द्व्यर्थः पचिः'** इति **भाष्यं** संगच्छत इति दिक् ॥७॥

एवं सिध्यतु फलव्यापारयोर्वाच्यत्वम्। किन्तु आख्यातवाच्यैव सा भावना, न धातोः। प्राधान्येन प्रतीयमानस्य व्यापारस्य धात्वर्थतायाः "प्रकृति-प्रत्यायर्थयोः प्रत्ययार्थस्य प्राधान्यम्" इति न्यायविरुद्धत्वात्। **'तदागमे हि दृश्यते'** इति न्यायविरुद्धत्वाच्च।

एवञ्च स्वयुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वमाख्यातार्थव्यापाराश्रयत्वं च कर्तृत्वं वाच्यमित्यादि वदन्तं मीमांसकम्मन्यं प्रत्याह -

**तस्मात्करोतिर्धातोः स्याद्व्याख्यानं न त्वसौ तिङाम्।**

**पक्ववान्कृतवान्पाकं किं कृतं पक्वमित्यपि ॥८॥**

तस्मादभिप्रायस्थहेतोः। स चेत्थम् – फलमात्रस्य धात्वर्थत्वे 'ग्रामो गमनवान्' इति प्रतीत्यापत्तिः, संयोगाश्रयत्वात्। फलानुत्पाददशायां व्यापारसत्त्वे 'पाको भवति' इत्यनापत्तिः, व्यापारविगमे फलसत्त्वे 'पाको विद्यते' इत्यापत्तिश्च । यत्तु भावप्रत्ययस्य घञादेरनुकूलव्यापारवाचकत्वान्नानुपपत्तिरिति, तन्न। कर्त्राख्यातवत् **'कर्तरि कृत्'** ( पा० सू० ३.४.६७) इत्यत एव तद्विधानालभे भावे विधायकानुशासन-वैयर्थ्यापत्तेः, तद्विरोधापत्तेश्च। अथ व्यापारोऽपि धात्वर्थ इत्यभ्युपेयमिति चेत् ? तर्हि धातुत एव सकलव्यापारलाभसम्भवेनाऽऽख्यातस्य

पृथक्छक्तिकल्पने गौरवमिति। 'पचति' इत्यस्य 'पाकं करोति' इति विवरणात्मा करोतिर्धातोरेव व्याख्यानम् – विवरणम् । अतस्तदपि नाऽऽख्यातार्थत्वे साधकमिति भावः ।

मीमांसकोक्तं बाधकमुद्धरन् तन्मतं दूषयति - 'न तु' इत्यादिना । नासौ तिङां व्याख्यानम्, 'पक्ववान्' इत्यादावनन्वयापत्तेरित्यर्थः । अयं भावः – 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यम्' इत्यत्र हि, 'विशेष्यतया प्रकृत्यर्थ-प्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुः' इति कार्यकारणभावः फलितः। तथा च 'पक्ववान्' इत्यत्र पाकः कर्मकारकं, क्तवतुप्रत्ययार्थः कर्तृकारकम् । तयोश्चारुणाधिकरणोक्तरीत्या वक्ष्यमाणास्मद्रीत्या चान्वयासम्भव इति प्रकृति-प्रत्ययार्थयोरन्वयनियमस्यैवाभावे क्व प्राधान्यबोधक उक्तकार्यकारणभावः? न च –

**"सम्बन्धमात्रमुक्तं च श्रुत्या धात्वर्थभावयोः ।**

**तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते ॥"**

इति **भट्टपादो**क्तरीत्या सम्बन्धसामान्येन कारकाणामन्वयः शङ्क्यः, योग्यताविरहात् । अन्वयप्रयोजकरूपवत्त्वस्य तत्त्वात् । क्रियात्वमेव हि कारकान्वयितावच्छेदकमिति वक्ष्यते, तदेवानिष्कर्तुं विवरणेन धात्वर्थक्तवत्वर्थयोः कर्मत्वकर्तृत्वे दर्शयति – कृतवान्पाकमिति । वस्तुतः "प्रत्ययार्थः प्रधानम्" इत्यस्य यः प्रधानं स प्रत्ययार्थ एवेति वा, यः प्रत्ययार्थः स प्रधानमेवेति वा नार्थः । अजा ऽश्वा छागीत्यादौ स्त्रीप्रत्यपार्थस्त्रीत्वस्यैव प्राधान्यापत्तेश्छाग्यादेरनापत्तेश्च । किं तूत्सर्गोऽयम् । विशेष्यत्वादिना बोधस्तु तथाव्युत्पत्त्यनुरोधात् । अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः । लक्षणायामलङ्कारिकाणां शक्यतावछेदकप्रकारक एव बोधो न तद्व्युत्पत्तिविरहतानामन्येषां तन्निराकाङ्क्षमेवेति सम्गाच्छते । अतः **"प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्"** (पा° सू° १.२.५६) इत्याह भगवान्पाणिनिः । प्रधानं प्रत्ययार्थ इति वचनं न कार्यमर्थस्य तथाबोधस्यान्यप्रमाणत्वाद्व्युत्पत्त्यनुसारित्वादिति हि तदर्थः । एवं सत्यपि नियामकापेक्षणे च **"भावप्रधानमाख्यातम्"** इति वचनमेव गृह्यतामिति सुधीभिरूह्यम् । "तदागमे हि " इति न्यायो विवरणं चातिव्याप्तमित्याह – किं कृतं पक्वमिति । कृञा विवरणं प्रतीतिश्च पक्वमित्यत्रापीति तत्रापि भावना वाच्या स्यादिति भावः । नन्वस्तु तिङ इव कृतामपि भावना वाच्येत्यत आह – अपीति । तथा चोभयसाधारण्येन तत्प्रतीतेरुभयसाधारणो धातुरेव वाचक इति भावः । भवद्रीत्या प्रत्ययार्थत्वात्प्राधान्यापत्तिश्चेति द्रष्टव्यम् ॥८॥

**किं कार्यं पचनीयञ्चेत्यादि दृष्टं हि कृत्स्वपि।**

**किञ्च क्रियावाचकतां विना धातुत्वमेव न ॥९॥**

कार्यम् इत्यत्र **“ऋहलोर्ण्यत्”** (पा°सू°३.१.१२४) इति कर्मणि ण्यत्। पचनीयमित्यादौ चानीयर्। आदिना ‘ज्योतिष्टोमयाजी’ इत्यादौ करणे उपपदे कर्त्तरि णिनिः। एते च क्रियायोगमन्तरेणासन्तस्तद्वाचतां बोधयन्ति। विना क्रियां कारकत्वासम्भवेन तद्वाचकप्रत्ययस्याप्यसम्भवात्। न च गम्यमानक्रियामादाय कारकयोग इति भाट्टरीतिर्युक्ता। आख्यातेऽपि तथात्वापत्तौ तत्रापि भावनाया वाच्यत्वासिद्ध्यापत्तेः।

अथ लिङ्गसङ्ख्यान्वयानुरोधात्कर्तुर्वाच्यत्वमावश्यकमिति, तेनाक्षेपाद्भावनाप्रत्ययः स्यादिति मतम्। तर्हि सङ्ख्यान्वयोपपत्तये आख्यातेऽपि कर्ता वाच्यः स्यात्। ‘पक्ववान्’ इत्यादि कालकारकान्वयानुरोधाद्भावनाया अपि तस्याऽऽवश्यकत्वाच्चेति भावः। अपिना हेत्वन्तर-समुच्चयः। तथाहि- ‘नखैर्भिन्नो नखभिन्नः, हरिणा त्रातो हरित्रातः’ इत्यादौ **‘कर्तृकरणे कृता बहुलम्’** (पा° सू° २.१.३२) इति समासो न स्यात्। ‘पुरुषो राज्ञो, भार्या देवदत्तस्य’ इतिवदसामार्थात्। न चाध्याहृतक्रियाद्वारा सामार्थ्यं वाच्यम्, ‘दध्योदनः, गुडधानाः,’ इत्यादिवत्। अन्यथाऽत्रापि **‘अन्नेन व्यञ्जनम्’** (पा° सू° २.१.३४) **‘भक्ष्येण मिश्रीकरणम्’** (पा° सू° २.१.३५) इति समासो न स्यादिति वाच्यम्, तत्र विध्यानर्थक्यादगत्या तथा स्वीकारेऽपि ‘हरिकृतम्’ इत्यादौ साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य **‘कर्तृकरणे°’** (पा° सू° २.१. ३२) इत्यस्याक्षेपेण परम्परासम्बन्धे प्रवृत्त्ययोगात्।

न चैकस्यां क्रियायायमन्वयित्वमेव सामार्थ्यमिति – शङ्क्यम्। **‘असूर्यम्पश्या’** इत्यादेरसमर्थसमासत्वानापत्तेः। इष्टापतौ – ‘कृतः सर्वो मृत्तिकया’ इत्यत्र ‘कृतः सर्वमृत्तिकः’ इष्टापत्तेः। न चात्र समासविधायकाभावः, **‘सह सुपा’** ( पा०सू०२.१.४) इति सत्त्वात्। अन्यथाऽसमर्थसमासोऽपि विधायकाभावान्न स्यादिति। किञ्च भावनायास्तिङर्थत्वे ‘भावयति घटम्’ इतिवद् ‘भवति घटम्’ इत्यपि स्यात्। धात्वर्थ-फलाश्रयत्वरूपकर्मत्वसत्त्वात्।

न चाऽऽख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात् तत्सञ्ज्ञया कर्मसञ्ज्ञाया बाधान्न द्वितीयेति वाच्यम्। आख्यार्थव्यापाराश्रयात्वस्य कर्तृत्वे ‘पाचयति देवदेत्तो विष्णुमित्रेण’ इत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ तृतीयानापत्तेः। ‘ग्रामं गमयति देवदत्तो विष्णुमित्रम् ’ इत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ ग्रामस्य गमिकर्मतनापत्तेश्च। तथा च – ‘ग्रामाय गमयति देवदत्तो विष्णुमित्रम्’ इत्यपि न स्यात्। **‘गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि’** (पा° सू ° २.३.१२) इति गत्यर्थकर्मण्येव चतुर्थीविद्यानात्। एतेन ‘णिजन्ते आख्यातार्थ उभयं, तदाश्रयत्वाद् देवदत्तयज्ञदत्तयोः कर्तृता’ इत्यपास्तम्।

किञ्च तस्मिन्प्रयोगे य आख्यातार्थ इत्यस्यावश्यकत्वेनाख्यातशून्ये 'देवदत्तः पक्ता' इत्यादौ देवदत्तस्याकर्तृतापत्तेरिति दिक्। सूत्रानुपपत्तिमपि मानत्वेन प्रदर्शयन्नुक्तार्थस्य स्वोत्प्रक्षितत्वं निरस्यति – किञ्चेति। धातु – सञ्ज्ञाविधायकं **'भूवादयो धातवः'** (पा° सू° १.३.१) इति सूत्रं, तत्र भूश्च वाश्चेति द्वन्द्वः। आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः। आदिश्च आदिश्च आदी, ततो भूवौ आदी येषां ते भूवादय इति बहुव्रीहिः। तथा च भूप्रभृतयोवासदृशा धातव इत्यर्थः। तच्च क्रियावाचकत्वेन। तथाच क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वं पर्यवसन्नम्। अत्र हि क्रियावाचित्वमात्रोक्तौ वर्जनादिरूपक्रियावाचके 'हिरुक्' 'नाना' इत्यादावतिव्याप्तिरिति भ्वादिगणपठितत्वम् उक्तम् ॥९॥

तावन्मात्रोक्तौ चाऽऽह -

**सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः।**

**न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम् ॥१०॥**

गणपठितत्वमात्रोक्तौ सर्वनामा यो 'या, तस्यापि धातुत्वं स्यात्'। तथा च 'याः पश्यसि' इत्यादौ **'आतो धातोः'** (पा° सू° ६.४.१४०) इत्यालोपापत्तिः। ननु लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो ग्रहणं तस्य लाक्षणिकत्वात्, इत्यत आह – वेत्यादि। अव्यये 'वा' इत्यादावतिप्रसङ्गस्तादृशस्यैव गणेऽपि पाठेन निर्णयासम्भवात्। तथा च विकल्पार्थको 'वाति' इति प्रयोगः स्यादिति भावः। न च गतिगन्धनाद्यर्थनिर्देशो नियामकः। तस्य **'अर्थानादेशनाद्'** इति **भाष्य**पर्यालोचनयाऽऽधुनिकत्वलाभात् ॥१०॥

नन्वस्तु क्रियावाचकत्वे सति गणपठितत्वं धातुत्वम्, क्रिया च धात्वर्थ एव, न व्यापार इति शङ्कां समाधत्ते -

**धात्वर्थत्वं क्रियात्वं चेद्धातुत्वं च क्रियार्थता।**

**अन्योन्यसंश्रयः स्पष्टस्तमादस्तु यथाकरम् ॥११॥**

यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वग्रहे तदर्थत्वरूपक्रियात्वग्रहः, क्रियात्वग्रहे तदवच्छिन्नावचकत्वघटितधातुत्वग्रह इत्यन्योऽन्याश्रय इति ग्रहपदं पूरयित्वा व्याख्येयम्। यथाश्रुते चान्योन्याश्रयास्योत्पत्तौ ग्रहे वा प्रतिबन्धकत्वाभ्युपगमेनासंगत्यापत्तेः। न चान्यतमत्वं धातुत्वम्। **"भूवादयो°"** (पा° सू° १.३.१) इत्यस्यवैयर्थ्यापत्तेरित्यभिप्रेत्याह – अस्त्विति। व्यापारसन्तानः क्रिया, तद्वाचकत्वे सति गणपठितत्वमित्यर्थः।

ननु सत्तादीन् फलांशानन्यतमत्वेनादाय तद्वाचकत्वे सति गणपठितत्वं लक्षणमुच्यताम्। धात्वर्थत्वात्तेषां क्रियाशब्देन व्यवहारो भाष्यादौ कृतोऽप्युपपत्स्यते इति चेत् ? न । अन्यतममध्ये विकल्पस्यापि 'विकल्पयति' इति प्रयोगानुसारात् प्रवेशावश्यकत्वेन तदर्थके 'वा' इत्यव्यये उक्तरीत्या गणपठितत्वसत्वेनातिव्याप्तिरिति ॥११॥

नन्वस्यैव धातुत्वे 'अस्ति' इत्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तदवाचकानामधातुत्वप्रसङ्ग इत्यत आह –

**अस्त्यादावापि धर्म्यंशे भाव्येऽस्त्येव हि भावना ।**

**अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥१२॥**

अस्त्यादौ 'अस भुवि' इत्यादौ । धर्म्यंशे धर्मिप्रयोगे । भाव्ये भाव्यत्वेन विवक्षिते । अस्त्येव – प्रतीयत एवायमर्थः । 'स ततो गतो न वा' इति प्रश्ने 'महता यत्नेनास्ति' इति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयत एव । उत्पत्त्यादिबोधने तु सुतराम्, **'रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभवत्' (रामायणे)** इत्यादिदर्शनात्। किञ्चात्र भावनाविरहे लडादिव्यवस्था न स्यात्। तस्या एव वर्तमानत्वादिविवक्षायां तद्विधानात्। **"क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका"** इति **वाक्यपदीयादिति** । नन्वेवम् 'अस्ति' इत्यत्र स्पष्टं कुतो न बुध्यत इत्यत आह– अन्यत्रेति। अशेषभावात्, भावनायाः फलसमानाधिकरणत्वात्। तथा च भावनायाः फलसामानाधिकरण्यं तत्स्पष्टत्वे दोष इति भावः ।

नन्वेवं 'किं करोति' इति प्रश्ने 'पचति' इत्युत्तरस्येव 'अस्ति' इत्युत्तरमपि स्यादिति चेद् ? इष्टापत्तिः, आसन्नविनाशं कञ्चिदुद्दिश्य 'किं करोति' इति प्रश्ने 'अस्ति' इत्युत्तरस्य सर्वसम्मतत्वात्। इतरत्र तु सुस्थतया निश्चिते 'किं करोति' इति प्रश्नः पच्यादिविशेषगोचर एवेत्यवधारणाद् 'अस्ति' इति नोत्तरमिति ॥१२॥

नन्वेवं भावनायाः फलनियतत्वात् फलाश्रयस्य च कर्मत्वात्सर्वेषां क्रियावाचतकत्वे सकर्मकतापत्तिरित्यत आह –

**फलव्यापारयोरेकनिष्ठतायामकर्मकः।**

**धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥१३॥**

एकनिष्ठतायाम् – एकमात्रनिष्ठतायाम्, भिन्नाधिकरणावृत्तितायामिति यावत्। तेन गम्यादौ फलस्य कर्तृनिष्ठत्वेऽपि नातिव्याप्तिः। अकर्मको यथा भ्वादिः। तयोः फलव्यापारयोराश्रयभेदे सकर्मक इत्यर्थः। उक्तञ्च **वाक्यपदीये** (३.३.४५)

**"आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।**

**अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः"॥** इति॥

बिभ्रदिति। तेन स्वधारणानुकूलो व्यापारोऽत्रापि गम्यत इति भावः। तेन कर्मणा सकर्मकत्वं तु नान्तरभावात्। फलांशेन सामानाधिकरण्यसत्त्वादित्यर्थः।

'आत्मानं जानाति, इच्छति' इत्यादौ च "द्वावात्मानौ, शरीरात्माऽन्तरात्मा च। तत्रान्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवती"ति **'कर्मवत्कर्मणा°'** ( पा° सू ° ३.१.८७) इति **सूत्रीयभाष्योक्तरीत्या** भिन्नाधिकरणनिष्ठतामादाय सकर्मकत्वमित्यवधेयम्॥१३॥

नन्वसत्त्यभूतक्रियाया धात्वर्थत्वे 'पाकः' इत्यत्रापि तत्प्रत्ययापत्तिः। न चेष्टापत्तिः, 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति भाष्यविरोधादित्यत आह –

**आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता।**

**प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥१४॥**[1]

आख्यातशब्दे -

'पश्य मृगो धावति' इत्यादौ। भागाभ्याम् – तिङन्ताभ्याम्। प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तमपव्याख्यानम, 'पचति' इत्यत्रापि भागद्वयसत्त्वात्। साध्यसाधनरूपता यथाक्रमं ग्राह्या। साध्यत्वं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वम्। साधनत्वं कारकत्वेनान्वयित्वम्। स घञादिष्वपीति। प्रकृत्या साध्यावस्था, प्रत्ययेन साधनावस्था। इयान्विशेषः, घञाद्युपस्थाप्या लिङ्गसङ्ख्यान्वयिनी कारकान्वयिनी च। आख्यातान्तोपात्ता तु नैवम्, तथापि कारकत्वेनान्वयित्वमात्रेण दृष्टान्तदार्ष्टान्तिकतेत्यवधेयम्।

न च घञन्ते धातुना तथाभिधाने मानाभावः, 'ओदनस्य पाकः' इति कर्मणि षष्ठ्या मानत्वात्। न च 'भवति' इत्यध्याहृततिङन्तक्रियान्वयात्षष्ठी, **"कर्तृकर्मणोः कृति"** (पा°सू° २.३.६५) इति कृदन्तेन योग एव तद्विधानात्, **"न लोकाव्ययनिष्ठाखलर्थतृनाम्"** (पा°सू° २.३.६९) इति लादेशयोगे षष्ठ्या

---

[1] This *Kārikā* originally belongs to *VP* – III.8.47. there is some variation in reading – आख्यातशब्दे भागाभ्यां साध्यसाधन**वर्तिता।** प्रकल्पिता यथा शास्त्रे स घञादिनिबन्धनः॥ *VP*, p. 365

निषेधाच्च। एवं रीत्या 'काष्ठैः पाकः' इत्याद्यपीष्टमेव। एवं फलांशोऽपि धातुनाऽसत्त्वावस्थापन्न एवोच्यते। अत एव 'स्तोकं पचति' इतिवत् 'स्तोकं पाकः' इत्युपपद्यत इति ॥१४॥

एतदेव स्पष्टयति –

**साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।**
**सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः॥१५॥**[2]

न च घञादिभिः सिद्धत्वेनाभिधाने मानाभावः, 'पाकः' इत्युक्ते 'भवति' 'जायते' 'नष्टः' इत्याकाङ्क्षोत्थानस्यैव मानत्वात्। धातूपस्थाप्यायां तदसमभवस्योक्तत्वात् 'स्तोकः पाकः' इत्यानापत्तेश्च। तस्माद् धात्वर्थान्वये स्तोकादिशब्देभ्यो द्वितीया, घञर्थान्वये प्रथमा पुल्लिङ्गता चेति तत्सिद्धये घञादेः शक्तिरुपेया। **एतेन घञादीनां प्रयोगसाधुतामात्रमिति नैयायिकनव्योक्तम्।**

न च घञन्तशक्त्योपस्थाप्यान्वये 'स्तोकः पाकः' इति भवतीति वाच्यम्, घञन्ताऽऽनुपूर्व्याः शक्तावच्छेदकत्वे गौरवाद्, अनुशासनाच्च घञादेरेव तथाशक्तिकल्पनाद् इति दिक्। एवं च घञ्शक्त्यभिप्रायेण 'कृदभिहितः' इति भाष्यम्; अतो न तद्विरोध इति भावः॥१५॥

ननु कारकाणां भावनान्वयनियमे एव 'पाकः' इत्यत्रापि कर्मषष्ठ्यनुसारेण भावनाय वाच्यत्वं सिध्येत्। स एव कुत इत्याशङ्कां समाधत्ते –

**सम्बोधनान्तं कृत्वोर्थाः कारकं प्रथमो वतिः।**

**धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ् ॥१६॥**

**तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्।**

**साधुत्वमष्टकस्याऽस्य क्रिययैवावधार्यताम् ॥१७॥**

सम्बोधनान्तस्य क्रियायामन्वयः, 'त्वं ब्रूहि देवदत्त' इत्यदौ निघातानुरोधात्। 'समानवाक्ये निघातयुष्मदस्मदादेशाः' इत्यनेन समानवाक्य एव तन्नियमात्। उक्तं हि **वाक्यपदीये** (२.५)

**"सम्बोधनपदं यच्च तत्क्रियाया विशेषणम्।**

**व्रजानि देवदत्तेति निघातोत्र तथा सति" इति॥**

---

[2] This *Kārikā* originally belongs to *VP* – III.8.48. there is some variation in reading – साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना। **सत्त्व**भावस्तु यस्तस्याः स घञादिनिबन्धनः॥ *VP*, p. 365

'पचति भवति देवदत्त' इत्यादौ तु सूत्रभाष्यादिरीत्या एकवाक्यतासत्त्वात् स्यादेव निघातः, **'तिङ्ङतिङः'** ( पा°सू° ८.१.२८) इति सूत्रतया तिङन्तानामप्येकवाक्यतास्वीकारात्। **'एकतिङ् वाक्यम्'** इति वदतां वार्तिककाराणां मते परं न। वस्तुत एकतिङ्विशेष्यकं वाक्यामिति तदभिप्रायस्य हेलाराजीयादौ **वैयाकरणभूषणे**ऽस्माभिश्च प्रतिपादितत्वात् तन्मतेऽपि भवत्येवेत्यवधेयम्।

कृत्वोऽर्थाः। **'क्रियाभ्यावृत्तिगणने कृत्वसुच्'** ( पा°सू° ५.४.१७) इति क्रियायोगे तत्साधुत्वोक्तेः। क्रियाया अभ्यावृत्तिः पुनः पुनर्जन्म तस्मिन्द्योत्य इति तदर्थात्। कारकम् **'कारके'** (पा°सू° १.४.२३) इत्याधिकृत्य तेषां व्युत्पादनात्। कारकशब्दो हि क्रियापरः। करोति कर्तुकर्मादिव्यपदेशान् इति व्युत्पत्तेः। तथा चाग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियार्थककारकशब्दानुवृत्त्या क्रियान्वयिनामेव सञ्ज्ञेति भाष्ये स्पष्टम्। प्रथमो वतिः। **'तेन तुल्यं क्रिया चेद्वतिः'** (पा°सू° ५.१.११५) इति विहितः। तत्र यत्तुल्यं सा क्रिया चेदित्युक्तत्वात्।

धातुसम्बन्धाऽधिकारे। **'धातुसम्बन्धे प्रत्ययाः'** ( पा°सू° ३.४.१) इत्यधिकृत्य तेषां विधानात्। असमस्तनञ्। समासायोग्यः प्रसज्य-प्रतिषेधीयो नञित्यर्थः, उत्तरपदार्थान्वयेऽपि समासविकल्पेन पक्षेऽसमस्तत्वाद् यथाश्रुतग्रहणयोगात्। न चासमस्तनञः क्रियाऽन्वये मानाऽभावः। न त्वं पचसि, न युवां पचथः, चैत्रो न पचति, घटो न जायते– इत्यादौ क्रियाया एव निषेधप्रतीतेः। अत एव विद्यमानेऽपि घटे तथाप्रयोगः। तथा च घटो नास्तीत्यत्राप्यस्तित्वाभाव एव बोध्यते। नहि – घटो न जायते, नास्तीत्यनयोर्धात्वर्थ-भेदमन्तेरेणास्ति विशेषः । तथा च- 'भूतले न घटः' इत्यत्राप्यस्तीत्यध्याहार्यम्। प्रकारतासम्बन्धेन नञर्थविशेष्यकबोधे धातुजन्यभावनोपस्थितेर्हेतुत्वस्य क्लृप्तत्वात्। शेषं नञर्थनिर्णये वक्ष्यते॥१६॥

**'यस्य च भावेन भावलक्षणम्'** ( पा°सू° २.३.३७) इत्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वाख्यानलाभात्। **'षष्ठी चाऽनादरे'** (पा°सू° २.३.३८) इति तदग्रिमसूत्रेऽपि चकाराद् यस्य च भावेनेत्यायातीत्यर्थः। साधुत्वमिति। तत्स्वरूपं च वक्ष्यते। क्रिययैवेति – अयं भावः – भूवादिसूत्रादिषु प्रायः क्रियाशब्देन भावनाव्यपदेशात् तत्र तस्य साङ्केतिकी शक्तिः; फलांशे क्वाचित्कः 'क्रियते' इति यौगिकः प्रयोगः। तथा च सञ्ज्ञाशब्दस्यानपेक्षप्रवृत्तत्वेन बलवत्त्वाद् भावनान्वय एव साधुता लभ्यते। अतएव सञ्ज्ञाशब्दप्राबल्याद् रथन्तरमुत्तराग्रन्थपठितऋक्ष्वेव गेयं न तु वेदे तदुत्तरपठ्यमानऋक्ष्विति नवमे निर्णितम्। किं च फलांशोऽपि भावनायां विशेषणं कारकाण्यपि क्वचित्तथाभूतानीति। **'गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्' (मीमांसादर्शने ३.१.२०)** इति न्यायेन सर्वे सेवका राजानमिव भावनायामेव परस्परनिरपेक्षाण्यनुयन्ति। **'न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके'** इति **न्यायेनापि** फलं त्यक्त्वा

भावनायामेवानुयन्तीति मीमांसका अपि मन्वते। एवं च विशेष्यतया कारकादिप्रकारकबोधं प्रति धातुजन्यभावनोपस्थितिर्हेतुरिति कार्यकारणभावस्य क्लृप्तत्वाद् यत्रापि 'पक्ता, पाचकः' इत्यादौ भावना गुणभूता तत्रापि क्लृप्तकार्यकारणभावानुरोधात् तस्यामेवान्वय इत्यवसीयत इत्यादि **भूषणे प्रपञ्चितम्**। केचित्तु 'भूतले घटः', 'देवदत्तो घटम्' इत्यादौ अन्वयबोधाकाङ्क्षानिवृत्तयोरदर्शनान्न तद्व्यतिरेकेण साधुत्वलाभ इत्याहुः ॥१७॥

स्वयमुपपत्तिमाह –

**यदि पक्षेऽपि वत्यर्थः कारकश्च नञादिषु ।**

**अन्वेति त्यज्यतां तर्हि चतुर्थ्याः स्पृहिकल्पना ॥१८॥**

पर्वतो वह्निमान् धुमान्महानसवत्। भूतले न घटः। भूतले घट इति आदिपदात्। एवमादिष्वनुशासनविरोधेऽपि यदि साधुत्वमन्वयश्चाभ्युपेयते तर्हि चतुर्थ्याः स्पृहिकल्पनाऽपि त्यज्यतामित्यर्थः। अनुशासनानुरोधतातौल्येऽर्धजरतीयमयुक्तमिति भावः ॥१८॥

एवं कर्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वय इत्याह -

**अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।**

**क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ॥१९॥**[3]

न विविच्य ग्रहो ग्रहणं यस्याः साऽविग्रहा गुणीभूतेति यावत्। तथा च 'ग्रामं गतः' इत्यत्र यथा क्तप्रकृत्यर्था गुणीभूताऽपि क्रिया ग्रामादिकर्मभिः सम्बध्यते, तथा 'कृतपूर्वी कटम्' इत्यत्रापि गुणभूता इन्यादिभिरित्यर्थः।

न च वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात् तत्रान्तर्गता भावना पदार्थैकदेश इति कथं तत्रान्वय इति वाच्यम्। नित्यसापेक्षेष्वेकदेशेऽपि 'देवदत्तस्य गुरुकुलम्, चैत्रस्य नप्ता' इत्यादाविवान्वयाभ्युपगमात् । एवं 'भोक्तुं पाकः' 'भुक्त्वा पाकः' इत्यत्रापि द्रष्टव्यम् ॥१९॥

अतिप्रसङ्गमाशङ्क्य समाधत्ते -

**कृत्वोर्थाः क्त्वातुमुन्वत्स्युरिति चेत् सन्ति हि क्वचित् ।**

**अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाऽऽश्रयात् ॥२०॥**

---

[3] This *Kārikā* originally belongs to *VP* – III.14.68. There is some variation in reading – अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः। **संबध्यते क्रिया** तद्वत् कृतपूर्व्यादिषु स्थिता॥ *VP*, p. 484

'भोक्तुं पाकः' 'भुक्त्वा पाकः' इत्यादौ **'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्'** ( पा°सू° ३.३.१०) **'समानकर्तृकयोः पूर्वकाले'** ( पा°सू° ३.४.२१) इति क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमाना अपि तुमुनादयो गुणभूतां तामादाय यथा जायन्ते, तथा कृत्वोऽर्था अपि स्युः। 'एकः पाकः' इत्यत्र **'एकस्य सकृच्च'** (पा°सू° ५.४.१९) 'द्वौ पाकौ, त्रयः, चत्वारः' इत्यत्र **'द्वित्रिचतुर्भ्यः सुच्'** (पा°सू° ५.४.१८), 'पञ्च' इत्यत्र कृत्वसुच् स्यात्। तथा च - 'सकृत् पाकः, द्विस्त्रिश्चतुः पाकः' इत्याद्याऽऽपत्तिरिति चेदिष्टापत्तिः, 'द्विर्वचनम्' इत्यादिदर्शनात्। अतिप्रसङ्गस्त्वनभिधानान्नेत्याह – अतीति। 'न हि वचिरन्तिपरः प्रयुज्यते' इत्याद्यभियुक्तोक्तरीत्या समाधेयमिति भावः। केचित्तु **'संख्यायाः क्रियाभ्यावृत्तिगणने '** ( पा°सू° ५.४.१७) इत्यत्र क्रियाग्रहणं व्यर्थम्। तस्या एवाभ्यावृत्तिसम्भवेन सामर्थ्यात् तल्लाभात्। तथा च साध्यमात्रस्वभावक्रियालाभाय तदिति वाच्यम्। न च 'पाकः' इत्यादौ तादृशीति नातिप्रसङ्गः। 'द्विर्वचनमिति च द्विःप्रयोगो द्विर्वचनम्' इति व्युत्पत्त्या **'द्विर्वचनेऽपि'** (पा°सू° १.१.५९) इति ज्ञापकं वाऽऽश्रित्योपपादनीयमित्याहुः॥२०॥

ननु सिद्धान्ते बोधकतारूपा शक्तिराख्यातशक्तिग्रहवतां बोधादावश्यकीति धातोरेव भावना वाच्या नाऽऽख्यातस्येति कथं निर्णय इत्याशङ्कां समाधत्ते -

**भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्।**

**साधुत्वं तदभावेऽपि बोधो नेह निवार्यते॥२१॥**

भेद्यं विशेष्यम्; भेदकं विशेषणम्। तयोर्यः सम्बन्धस्तस्य यो भेदस्तन्निबन्धनं साधुत्वम्। अयमर्थः– व्याकरणस्मृतिः शब्दसाधुत्वपरा, तत्रैवावच्छेदकतया कल्प्यमानधर्मस्य शक्तित्वं वदतां मीमांसकानां पुनः शक्तत्वं साधुत्वमित्येकमेवेति तद्रीत्या विचारे साधुत्वनिर्णये शक्तिनिर्णय उच्यते। अतिरिक्तशक्तिवादेऽपि आख्यातानामसाधुता भावनायां स्यादेव। तथा च चतुर्थ्यर्थे तृतीयाप्रयोगाद् धात्वर्थभावनायामाख्यातप्रयोगे याज्ञे कर्मण्यसाधुशब्दप्रयोगात् **"नानृतं वदेत्"** इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं दर्शनान्तरीयव्युत्पत्तिमतां स्यादिति।

ननु त्वन्मते नानृतमिति निषेधः क्रत्वर्थ एव न सिध्येत्। आख्यातेन कर्तुरुक्तत्वाच्छ्रुत्या पुरुषार्थतैव स्यात्। प्रकरणाद् हि क्रत्वर्थता, तच्च श्रुतिविरोधे बाध्यत इति चेन्न। **'तिङर्थस्तु विशेषणम्'** (कारिका २) इत्यनेन परिहृतत्वात्। न हि गुणभूतः कर्तानिषेधं स्वाङ्गत्वेन ग्रहीतुमलम्। भावना तु प्रधानं तं ग्रहीतुं समर्थेति प्रकरणात् क्रत्वर्थतैव। अस्तु वा क्रतुयुक्तपुरुषधर्मः, अनुष्ठाने विशेषाभावात्। **'जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू'** इति वाक्योक्तमन्त्रविधिवदित्यादि **भूषणे प्रपञ्चितम्।**

नन्वाख्यातस्य भावनायामसाधुत्वे ततस्तद्बोधो न स्यात् साधुत्वज्ञानस्य शाब्दबोधे हेतुत्वादित्यत आह – बोध इति। असाधुत्वेऽपि साधुत्वभ्रमाद् बोधोऽस्तु नाम, अपभ्रंशवत्। असाधुत्वं तु स्यादेवेति भावः। वस्तुतः साधुत्वज्ञानं न हेतुः, तद्व्यतिरेकनिर्णयोऽपि न प्रतिबन्धक इति 'असाधुरनुमानेन' (कारिका ३८) इत्यत्र वक्ष्यामः ॥२१॥

**रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन निर्मिते।**

**पूर्णो भूषणसारेऽस्मिन् धात्वाख्यातार्थनिर्णयः ॥**

## इति वैयाकरणभूषणसारे धात्वर्थाख्यातनिरूपणम्॥

## ।।अथ लकारार्थनिर्णयः।।

प्रत्येकं दशलकाराणामर्थं निरूपयति -

**वर्त्तमाने परोऽक्षे श्वो भाविन्यथ भविष्यति।**

**विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः ॥२२॥**

लडादयष्टितः षट् क्रमेणेष्वर्थेषु द्रष्टव्याः। तथा हि - '**वर्त्तमाने लट्**' (पा०सू० ३.२.१२३) इति सूत्रात्। प्रारब्धापरिसमाप्तत्वम्, भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम्। 'पचति' इत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तदस्तीति लट्प्रयोगः। आत्माऽस्ति, पर्वताः सन्तीत्यादौ तत्तत्कालिकानां राज्ञां क्रियाया अनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिकमादाय वर्त्तमानत्वमूह्यम्। उक्तं हि **भाष्ये - "इह भूतभविष्यद्वर्त्तमानानां राज्ञां क्रियास्तिष्ठतेरधिकरणम्"** इति

**परतो भिद्यते सर्वमात्मा तु न विकम्पते।**

**पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते ॥**

इति **वाक्यपदीये** च। एवं "तम आसीत्"। "तुच्छेनाभ्यपिहितं यदासीत्" "अहमेकः प्रथममासम्, वर्त्तामि च भविष्यामि च" इत्यादिश्रुतयोऽपि योज्याः।

तच्च वर्त्तमानत्वादि लडादिभिर्द्योत्यते क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणायां लडादेस्तात्पर्य ग्राहकत्वेनोपयोगात्। अन्वयव्यतिरेकाभ्यां तद्रूपं लडादिवाच्यमेव। अन्यथा प्रत्ययानां वाचकत्वविलोपापत्तिरित्यपि पक्षान्तरम्।

लिडर्थमाह-परोक्षे इति - **'परोक्षे लिट्'** (पा०सू० ३.२.११५) इति सूत्रात्। कालस्तावदद्यतनानद्यतनभेदेन द्विविधः। द्विविधोऽपि भूतभविष्यद्रूपः। तत्रानद्यतने भूते परोक्षे लिडित्यर्थः। तेनाद्यतनभूते, अनद्यतने भविष्यति, भूतेऽप्यपरोक्षे च न लिट्प्रयोगः।

परोक्षत्वञ्च -'साक्षात्करोमि' इत्येतादृशांविषयताशालिज्ञानाविषयत्वम्।

न च "क्रिया नामेयमत्यन्तापरदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्" इति भाष्यात्तस्या अतीन्द्रियत्वेन 'परोक्षे' इत्यव्यावर्त्तकमिति शङ्क्यम् । पिण्डीभूताया निदर्शयितुमशक्यत्वेऽप्यवयवशः 'साक्षात्करोमि' इति प्रतीतिविषयत्वात् । अन्यथा 'पश्य मृगो धावति' इत्यत्र तस्या दर्शनकर्मता न स्यादिति प्रतिभाति। व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यं विवक्षितमतो नोक्तदोषः। 'अयं पपाच' इत्याद्यनुरोधाद् व्यापाराविष्टानामित्यपि वदन्ति।

कथं तर्हि "व्यातेने किरणावलीमुदयनः" इति स्वक्रियायाः स्वप्रत्यक्षत्वादिति चेत् । असङ्गतमेव, व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽपि 'बहुतरमनःप्रणिधानसाध्यशास्त्रार्थनिर्णयजनकशब्दरचनात्मके ग्रन्थे' अनद्यतनत्वातीतत्वयोर्विस्तारक्रियायामसत्त्वेनानद्यतनातीतत्त्वयोरभावेन तदर्थकलिडसम्भवात्।

लुडर्थमाह-श्वो भाविनीति। अनद्यतने भाविनीत्यर्थः, **'अनद्यतने लुट्'** (पा०सू० ३.३.१५) इति सूत्रात्। यथा-'श्वो भविता' इत्यादौ। लृडर्थमाह-भविष्यतीति। भविष्यत्सामान्ये इत्यर्थः, **'लृट् शेषे च'** (पा०सू० ३.३.१३) सूत्रात्। यथा-'घटो भविष्यति' इत्यादौ। तत्त्वञ्च वर्त्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम्।

लेटोऽर्थमाह-विध्यादाविति। **'लिङर्थे लेट्'** (पा०सू० ३.४.७) इति सूत्रात्। लिङर्थश्च विध्यादिरिति वक्ष्यते। लोडर्थमाह-प्रार्थनेति। आदिना विध्याद्याशिषो गृह्यन्ते, **'आशिषि लिङ्लोटौ'** (पा०सू० ३.३.१७३) **'लोट् च'** (पा०सू० ३.३.१६२) इति सूत्राभ्यां तथाऽवगमात्। यथा -'भवतु ते शिवप्रसादः' इत्यादौ। एतयोरर्थो लिङर्थ एव त्रयाणां समानार्थत्वादिति तन्निर्णयेनैव निर्णयः ॥२२॥

लङादिक्रमेण ङितामर्थमाह-

**ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः।**

**सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ्स्मृतः ॥२३॥**

लङर्थमाह - ह्यो भूत इति। अनद्यतने भूत इत्यर्थः, **'अनद्यतने लङ्'** (पा०सू० ३.२.१११) इति सूत्रात्। यथाऽस्य पुत्रोऽभवदित्यादौ। लिङर्थमाह-प्रेरणादाविति। **'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्'**

(पा०सू० ३.३.१६१) इति सूत्रात्। तत्र विधिः प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्त्तनम्। निमन्त्रणम् नियोगकरणम्, आवश्यके ( श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनम्) प्रेरणेत्यर्थः। आमन्त्रणं कामचारानुज्ञा। अधीष्टः सत्कारपूर्वको व्यापारः। सम्प्रश्नः= सम्प्रधारणम्।

एतच्चतुष्टयानुगतप्रवर्त्तनात्वेन वाच्यता लाघवात्। उक्तञ्च-

**अस्ति प्रवर्त्तनारूपमनुस्यूतं चतुर्ष्वपि ।**

**तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ॥**

**न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा ।**

**विध्यादीनामुपादानं चतुर्णामादितः कृतम् ॥ इति ॥**

प्रवर्त्तनात्वञ्च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्। तच्चेष्टसाधनत्वस्यास्ति तदेव विध्यर्थः।यद्यप्येतत् कृतिसाध्यत्वस्यापि अस्ति, तज्ज्ञानस्यापि प्रवर्त्तकत्वात्, तथापि यागादौ सर्वत्र तल्लोकत एवावगम्यत इत्यन्यलभ्यत्वान्न तच्छक्यम्। बलवदनिष्टाननुबन्धित्वज्ञानञ्च न हेतुः, द्वेषाभावेनान्यथासिद्धत्वात्, आस्तिककामुकस्य नरकसाधनताज्ञानदशायामप्युत्कटेच्छया द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च । तस्मादिष्टसाधनत्वमेव प्रवर्त्तना । उक्तश्च **मण्डनमिश्रैः** -

**पुंसा नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः ।**

**प्रवृत्तिहेतुं धर्मश्च प्रवदन्ति प्रवर्त्तनाम् ॥ इति ॥**

**प्रपञ्चितं चैतद्वैयाकरणभूषणे।**

आदिना **'हेतुहेतुमतोर्लिङ्'** (पा०सू० ३.३.१५६), **'आशिषि लिङ्लोटौ'** (पा०सू० ३.३.१७३) इति सूत्रोक्ता हेतुहेतुमद्भावादयो गृह्यन्ते। **"यो ब्राह्मणायावगुरेत्तं शतेन यातयेत्"** इति यथा। लुङर्थमाह - भूतमात्र इति। भूतसामान्ये इत्यर्थः, भूते लुङ्। 'भूते' इत्यधिकृत्य **'लुङ्'** (पा०सू०३.२.११०) इति सूत्रात्। अत्र "विद्यमानध्वंसप्रतियोगित्वं भूतत्वम्"। तच्च क्रियायां निर्बाधमिति विद्यमानेऽपि घटे घटोऽभूदिति प्रयोगः। विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयक उत्पत्त्याद्यनुकूलो व्यापार इति बोधः ।

अयमत्र संग्रहः - कालो द्विविधः, अद्यतनोऽनद्यतनश्च। आद्यस्त्रिविधः - भूतभविष्यद्वर्त्तमानभेदात्। अन्त्यो द्विविधः - भूतो भविष्यंश्च। तत्र वर्त्तमानत्वे लट्। भूतत्वमात्रे लुङ्। भविष्यन्मात्रे लृट्। हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामनयोर्लृङ्। अनद्यतने भूतत्त्वेन विवक्षिते लङ्। तत्रैव परोक्षत्वविवक्षायां लिट्। तादृशे भविष्यति लुट्, इति द्रष्टव्यः।

लृङर्थमाह - सत्यामिति। क्रियाया अतिपत्तिः = अनिष्पत्तिस्तस्यां गम्यमानाायाम्, भूते भाविनि हेतुहेतुमद्भावे सति लृङित्यर्थः। **'लिङ्निमित्ते लृङ् क्रियातिपत्तौ'** (३।३।१३९) इति सूत्रात्। लिङो निमित्तं हेतुहेतुमद्भावादि। यथा - "सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत्।" 'वह्निश्चेत् प्राज्वालिष्यदोदनमपक्ष्यत्' इत्यादौ। अत्र वह्न्यभिन्नाश्रयकप्रज्वलनानुकूलव्यापाराभावप्रयुक्त[4] ओदनभिन्नाश्रयकविक्लित्त्यनुकूल-व्यापाराभाव इति शाव्दबोधः। एवं रीत्या द्रष्टव्यम्। अयञ्चार्थनिर्देशन उपलक्षणम्, अर्थान्तरेऽपि बहुशो विधानदर्शनात्। प्रसिद्धत्वादेष्वेवार्थेषु शक्तिरन्यत्र लक्षणेति मतान्तररीत्या वोक्तम्। एतेषां क्रमनियामकश्चानुबन्धक्रम एव । अत एव पञ्चमो लकार इत्यनेन मीमांसकैर्लेड् व्यवह्रियत इति दिक् ॥२३॥

## इति वैयाकरणभूषणसारे लकारार्थनिरूपणम्।

## ।।अथ सुबर्थनिर्णयः।।

सुबर्थमाह-

**आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।**

**यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ॥२४॥**

द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः। तथा हि - **'कर्मणि द्वितीया'** (पा०सू० २.३.२)।तच्च **'कर्तुरीप्सिततमं'** (पा०सू० १.४.४९) -क्रियाजन्यफलाश्रय इत्यर्थः, कर्मजन्यफलवत्त्वेन एव कर्तुरीप्सिततमत्वात्। **'तथा युक्तञ्चानीप्सितम्'**। (पा०सू० १.४.५०) इत्यादिसंग्रहाच्चैवमेव युक्तम्। ईप्सितानीप्सितत्वयोः शाब्दबोधे मानाभावेन संज्ञायामेव तदुपयोगः, न तु वाक्यकोटौ[5] तत्प्रवेशः। तथा च क्रियायाः, फलस्य च धातुनैव लाभादनन्यलभ्य आश्रय एवार्थः। तत्त्वञ्चाखण्डशक्तिरूपमवच्छेदकम्।

'ओदनं पचति' इत्यत्र विक्लित्त्याश्रयत्वात् कर्मता 'घटं करोति' इत्यत्रोत्पत्त्याश्रयत्वात् । उत्पत्तेर्धात्वर्थत्वात्। 'जानाति' इत्यत्रावरणभङ्गरूपज्ञाधात्वर्थफलाश्रयत्वात्, अतीताऽनागतादिपरोक्षस्थलेऽपि ज्ञानजन्यस्य तस्याऽवश्यकत्वात्। अन्यथा 'यथापूर्वं न जानामि-' इत्यापत्तेः। अतीतादेराश्रयता च विषयतया ज्ञानाश्रयताया नैयायिकानामिव, सत्कार्यवादसिद्धान्ताद्वोपपद्यते। उक्तञ्च-

---

[4] प्रयोज्य – in Ananta Śāstri's edi. P. 134 and Brahmadatta's edi. P. 213.

[5] वाच्यकोटौ – in Ananta Sastri's edi. P. 137 and Brahmadatta's edi. P. 217.

**तिरोभावाऽभ्युपगमे भावानां सैव नास्तिता।**

**लब्धक्रमे तिरोभावे 'नश्यतीति प्रतीयते ॥ इति ॥**

ननु 'चैत्रो ग्रामं गच्छति' इत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यसंयोगरूपफलाश्रयत्वात् कर्मतापत्तौ 'चैत्रश्चैत्रं गच्छति', इत्यापत्तिः, 'प्रयागतः काशीं गच्छति चैत्रः', 'प्रयागं गच्छति' इत्यापत्तिश्च' क्रियाजन्यसंयोगस्य काश्यामिव विभागस्य प्रयोगेऽपि सत्त्वात्, इति चेन्न, ग्रामस्येव चैत्रस्यापि फलाऽश्रयात्वेऽपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधेन 'चैत्रश्चैत्रम्' इति प्रयोगासम्भवात्, द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वात्। अन्यथा गमयति कृष्णं गोकुलमित्यत्रेव 'पाचयति कृष्णेन' इत्यत्रापि कृष्णपदाद् द्वितीयापत्तेः। शाव्दबोधः 'चैत्रश्चैत्रम्' इत्यत्र स्यादिति चेन्न, तथा व्युत्पन्नानामिष्टाऽपत्तेः। उच्यतां वा "प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकवोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतुः" इति कार्यकारणभावान्तरम्। प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः। प्रयागस्य कर्मत्वं तु सम्भावितमपि न, समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रियाजन्येत्यनेन विवक्षणस्योक्तप्रायत्वात्।

नैयायिकास्त्वाद्यदोषवारणाय परसमवेतत्वम्, द्वितीयदोषवारणाय धात्वर्थतावच्छेदकत्वं फले विशेषणं द्वितीयावाच्यमित्युपाददते। परसमवेतत्वं धात्वर्थक्रियायामन्वेति तथैव कार्यकारणभावान्तरकल्पनात्। परत्वञ्च - द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते। तथा च "चैत्रस्तण्डुलं पचति" इत्यादौ तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिशालित्वात् तण्डुलस्य कर्मता। शाव्दबोधस्तु तण्डुलसमवेतधात्वर्थतावच्छेदकविक्लित्त्यनुकूलतण्डुलान्यसमवेतक्रियाजनककृतिमांश्चैत्र इत्याहुः।

तन्न रोचयामहे। परसमवेतत्वादेर्गौरवेणावाच्यत्वात्। अतिप्रसङ्गः किं द्वितीयायाः, शाव्दबोध वा? नाद्यः, तावद्वाच्यकथनेऽपि तत्तादवस्थ्यात्, 'गमयति कृष्णं गोकुलम्' इतिवत् 'पाचयति कृष्णं गोपः' इति द्वितीयापत्तेः। 'तण्डुलं पचति चैत्रः' इतिवत् 'तण्डुलं पच्यते स्वयमेव' इत्यापत्तेश्च। विक्लित्त्यनुकूलतण्डुलान्यसमवेताग्निसंयोगरूपधात्वर्थाश्रयत्वात्। शाव्दबोधातिप्रसङ्गोऽप्युक्तरीत्यैव निरस्तः। परसमवेतत्त्वस्य शक्यत्वेऽपि परत्वस्य, परसमवेतत्वस्य चेष्टान्वयलाभायानेकशः कार्यकारणभावाभ्युपगमे गौरवान्तरत्वादिति स्पष्टं **भूषणे**।

एतच्च सप्तधिकम्-

**निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्।**

**तच्चेप्सिततमं कर्म, चतुर्धाऽन्यत्तु कल्पितम् ॥**

**औदासीन्येन यत्प्राप्यं यच्च कर्त्तुरनीप्सितम्।**

**संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥** इति **वाक्यपदीयात्**।

**यदसञ्जायते सद्वा जन्मना यत्प्रकाशते ।**

**तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम् ॥**

**प्रकृत्युच्छेदसम्भूतं किञ्चत् काष्ठादिभस्मवत् ।**

**किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥**

**क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।**

**दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥ इति च तत्रैवोक्तम्।**

घटं करोतीत्याद्यम् । काष्ठं भस्म करोतीति सुवर्णं कुण्डलं करोतीति च द्वितीयम्। घटं पश्यतीति तृतीयम्। तृणं स्पृशतीत्युदासीनम् । विषं भुङ्क्त इति द्वेष्यम् । गां दोग्धीति संज्ञान्तरैरनाख्यातम् । क्रूरमभिक्रुध्यतीत्यन्यपूर्वकम् ।कर्तृतृतीयाया आश्रयोऽर्थः। तथा हि -**"स्वतन्त्रः कर्त्ता"** (पा०सू० १.४.५४) स्वातन्त्र्यञ्च- धात्वर्थव्यापाराश्रयत्वम्। **"धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते"** इति **वाक्यपदीयात्**। अत एव यदा यदीयो व्यापारो धातुनाऽभिधीयते तदा स कर्त्ता इति। स्थाली पचति, अग्निः पचति, एधांसि पचन्ति, "तण्डुलः पच्यते स्वयमेव" इत्यादि सङ्गच्छते।

**नन्वेषम् कर्मकर्तृव्यदेशाच्च (ब्र.सू.।१।२।४)** इति सूत्रे 'मनोमयः प्राणशरीरः' इति वाक्यस्य मनोमयस्य जीवत्वे वाक्यशेषे तस्य "एतमितः प्रेत्याभिसम्भविताऽस्मि" इति प्राप्तिकर्मत्वकर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं सङ्गच्छताम्? उच्यते-जीवस्यैव ज्ञेयत्वे प्राप्तिकर्मत्वमपि वाच्यम् । कर्तृत्वञ्च तस्याऽऽख्यातेनोक्तम्। न चैकस्यैकदा संज्ञाद्वयं युक्तम् । कर्तृसंज्ञाया कर्मसंज्ञया बाधात्। तथा च 'एतम्' इति द्वितीया न स्यात्। कर्मकर्तृतायाञ्च यगाद्यापत्तिरिति शाब्दविरोधद्वारा भवति स भेदहेतुः।एवञ्च व्यापारांशस्य धातुलभ्यत्वादाश्रयमात्रं तृतीयार्थः। **कारकचक्र**प्रयोगक्तृत्वम्, कृत्याश्रयत्वं वा 'दण्डः करोति' इत्यत्राव्याप्तम्।

अयञ्च त्रिविधः - शुद्धः प्रयोजको हेतुः कर्मकर्त्ता च। मया हरिः सेव्यते । कार्यते हरिणा। गमयति कृष्णं गोकुलम्। मदभिन्नाश्रयको हरिकर्मकसेवनानुकूलो व्यापारः, हर्यभिन्नाश्रयक उत्पादानुकूलो व्यापारः, गोकुलकर्मकगमनानुकूलकृष्णाश्रयकतादृशव्यापारानुकूलो व्यापार इति शाब्दबोधः। करणतृतीयास्त्वाश्रयव्यापारौ वाच्यौ। तथा हि - **"साधकतमं करणम्"** (पा०सू० १.४.४२ )। तमवर्थः प्रकर्षः। स चाव्यवधानेन फलजनकव्यापारवत्ता। तादृशव्यापारवत्कारणञ्च करणम्।

उक्तञ्च **वाक्यपदीये-**

**क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।**

**विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥**

**वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।**

**'स्थाल्या पच्यत' इत्येषा विवक्षा दृश्यते यतः ॥ इति ॥**

'विवक्ष्यते' इत्यनेन सकृदनेकेषां तदभावाद् द्वितीयासप्तम्यादेरवकाशं सूचयति।

न चैवम् **"कर्त्ता शास्त्रार्थवत्त्वात्"** इत्युत्तरमीमांसाधिकरणे 'शक्तिविपर्ययात्' इति सूत्रेणान्तःकरणस्य कर्तृत्वे करणशक्तिविपर्ययापत्तिरुक्ता न युज्येतेति वाच्यम्, **"तदैवैतेषां प्राणानां विज्ञानेन विज्ञानमादाय"** इति श्रुत्यन्तरे करणतया क्लृप्तस्य कर्तृतां प्रकल्प्य शक्तिविपर्ययापत्तिर्निष्प्रमाणा कल्प्येतेत्यभिप्रायात्।

सप्तम्या अप्याश्रयोऽर्थः। **"सप्तम्यधीकरणे च"** (पा०सू० २.३.३६) इत्यधिकरणे सप्तमी। तच्च **"आधारोऽधिकरणम्"** (पा०सू० १.४.४५) इति सूत्रादाधारः। तत्त्वञ्चाश्रयत्वम्। तत्राश्रयांशः शक्यः, तत्त्वमवच्छेदकम्।

न चाश्रयत्वमात्रेण कर्मकर्तृकरणानामाधारसंज्ञा स्यात्, यदि ताभिरस्या न बाधः स्यात्। **कारके** (पा०सू० १.४.२३) इत्यधिकृत्य विहितसप्तम्याः क्रियाश्रय इत्येव यद्यपि तात्पर्यं तथाप्यत्र कर्तृकर्मद्वारा तदाश्रयत्वमस्त्येव। स्थाल्यादेर्भूतलकटादेश्चेति 'स्थाल्यां पचति' 'भूतले वसति' 'कटे शेते' इत्याद्युपपद्यते।

उक्तञ्च **वाक्यपदीये -**

**कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् ।**

**उपकुर्वात्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥ इति ॥**

एतच्च त्रिविधम्। औपश्लेषिकं वैषयिकमभिव्यापकं च। कटे शेते, गुरौ वसति, मोक्षे इच्छाऽस्ति, तिलेषु तैलमिति। एतच्च **"संहितायाम्"** (पा०सू० ६.१.७२) इति सूत्रे **भाष्ये** स्पष्टम्।

अवधिः पञ्चम्यर्थः। **"अपादाने पञ्चमी"** (पा०सू० २.३.२८) इति सूत्रात्। तच्च **"ध्रुवमपायेऽपादानम्"**। (पा०सू० १.४.२४) इति सूत्रात्। अपायः = विश्लेषस्तज्जनकक्रिया, तत्रावधिभूतमपादानमित्यर्थ कादवधिभुतमिति भावः।

उक्तञ्च **वाक्यपदीये** -

**अपाये यदुदासीनं चलं वा यदि वाऽचलम् ।**

**ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥**

**पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ ।**

**तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते ॥**

**उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके ।**

**विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते ॥**

**मेषान्तरक्रियापेक्षमवधित्वं पृथक्पृथक् ।**

**मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथक् ॥**

अस्यार्थः - अपाये=विश्लेषहेतुक्रियायाम्, उदासीनम्=अनाश्रयः, अतदावेशात्= तत्क्रियानाश्रयत्वात्। एवच्च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम्। 'वृक्षात् पर्णं पतति, इत्यत्र पर्णस्य तद्वारणाय सत्यन्तम्।

'धावतोऽश्वात् पतति' इत्यत्राश्वस्य क्रियाश्रयत्वाद्विश्लेषहेत्विति। "कुड्यात्पततोऽश्वात् पतति" इत्यत्राश्वस्य विश्लेषजनकक्रियाश्रयत्वेऽपि तन्न विरुद्धमित्याहयस्मादश्वादिति। तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति विशेषणीयमिति भावः। एवमश्वनिष्ठक्रियानाश्रयत्वात् कुड्यादेरपि ध्रुवत्यमित्याह-तस्यापीति।

उभयकर्मजविभागस्थले विभागस्यैक्यात्तद्विश्लेषजनकक्रियानाश्रयत्वाभावात् "परस्परान्मेषावपसरतः" इति न स्यादित्याशङ्क्य समाधत्ते-उभावपीति। मेषान्तरेति - यथा निश्चलमेषादपसरद्द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय परस्य ध्रुवत्वं तथाऽत्रापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वमिति तथा च "विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वम्" वाच्यम्। क्रिया चात्र धात्वर्थो न तु स्पन्दः। तेन वृक्षकर्मजविभागवति वस्त्रे 'वृक्षात् वस्त्रं पतति' इति सङ्गच्छते। वस्तुतो नैवावत्पञ्चम्या वाच्यम्, किन्तु 'अवधेर्लक्षणमात्रम्' द्वितीयार्थोक्तरीत्या प्रयोगातिप्रसङ्गस्यासम्भवेन वाच्यकोटौ प्रवेशस्य गौरवेणाऽसम्भवादिति तु प्रतिभाति। न चैवमपि 'वृक्षात् स्पन्दते' इति स्यादिति शङ्क्यम्, "आसनाच्चलितः", 'राज्याच्चलितः' इतिवदिष्टत्वात्। एतेन पञ्चमीजन्यापादानत्वबोधे सकर्मकधातुजन्योपस्थितेर्हेतुत्वमिति समाधानाभासोऽप्यपास्तः।

न चैवमपि वृक्षात्त्यजतीति दुर्वारम्, कर्मसंज्ञयाऽपादानसंज्ञाया बाधेन पञ्चम्यसम्भवात्। भ्रमात्कृते तथा प्रयोगे यदि बोधाभावोऽनुभवसिद्धस्तर्हि पञ्चमीजन्यापादानत्वबोधे त्यजादिभिन्नधातुजन्यबुद्धेर्हेतुत्वं वाच्यम्। 'बलाहकाद्विद्योतते' इत्यादौ निःसृत्येत्यध्याहार्यम्। 'रूपं रसात्पृथक्' इत्यत्र तु बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम्, पृथग्विनेति पञ्चमी वा।

इदं च-

**"निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा।**

**अपेक्षितक्रियञ्चेति त्रिधाऽपादानमुच्यते ॥"**

इति **वाक्यपदीया**त्त्रिविधम्। यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयम्। यथा- अश्वात् पतति। यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह तदुपात्तविषयम्। यथा बलाहकाद्विद्योतते। निःसरणाङ्गे विद्योतने द्युतिर्वर्तते। अपेक्षितक्रिया यत्र तदन्त्यम्। यथा कुतो भवान् ? पाटलिपुत्रात्। अत्राऽऽगमनमर्थमध्याहृत्यान्वयः कार्यः।

उद्देश्यश्चतुर्थ्यर्थः। तथा हि-सम्प्रदाने चतुर्थी। तच्च **"कर्मणा यमभिप्रैति स सम्प्रदानम्"** (पा०सू० १.४.३२) इतिसूत्रात्कर्मणाकरणभूतेन यमभिप्रैतीप्सति तत्कारकं संप्रदानमित्यर्थकादुद्देश्यः।

इदमेव शेषित्वम्। तदुद्देश्यकेच्छाविषयत्वं च शेषत्वमित्येव पूर्वतन्त्रे निरूपितम्। अत एव "**प्रासनवन्मैत्रावरुणाय दण्डप्रदानम्**" **(अ.४ पा.२ अधि.६)** इत्यधिकरणे क्रीते सोमे मैत्रारुणाय दण्डं प्रयच्छतीति विहितं दण्डदानं न प्रतिपत्तिः, किन्तु चतुर्थीश्रुत्याऽर्थकर्मेति तत्र निर्णीतम्। रजकाय वस्त्रं ददातीत्यपि खण्डिकोपाध्यायः शिष्याय चपेटां ददातीति भाष्योदाहरणादिष्टमेव। वृत्तिकारास्तु सम्यक्प्रदीयते यस्मै तत्सम्प्रदानमित्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तः 'रजकस्य वस्त्रम्' इत्येवाहुः।

इदञ्च-

**अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम्।**

**प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम् ॥**

इति **वाक्यपदीया**त् त्रिविधम्। "सूर्यायार्घ्यं ददाति" इत्याद्यम्। नात्र सूर्यः प्रार्थयते, नानुमन्यते, न निराकरोति। प्रेरकम् - विप्राय गां ददाति। अनुमन्तृ - उपाध्यायाय गां ददाति। अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः। विभक्तिनां धर्मिवाचकत्वात्।धर्ममात्रवाचकत्वे **"कर्मणि द्वितीया"** (पा०सू० २.३.२) इति सूत्रस्वरभङ्गापत्तेः। कर्मार्थकृत्तद्धितादौ तथादर्शनाच्च। द्वितीयाद्यर्थकबहुव्रीहौ 'प्राप्तोदकः' इत्यादौ धर्मिवाचकत्वलाभाच्च।

**"सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम्"** इति **भाष्या**च्चेति दिक्।

आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता, किन्त्वाश्रयत्वमात्रं वाच्यम्। तदेव च तादात्म्येनावच्छेदकम्। करणतृतीयायाश्च व्यापारोऽपि, पञ्चम्या विभागमात्रम्, चतुर्थ्या उद्देश्यत्वमात्रम्। अत एवाकृत्यधिकरणमपि न

विरुद्ध्यत इत्यभिप्रेत्याह शक्तिरेव वेति। षण्णामपीति शेषः। **"षष्ठी शेषे"** (पा०सू० २.३.५०) इति सूत्रात् तस्याः सम्बन्धमात्रं वाच्यम्। कारकषष्ठ्यास्तु शक्तिरेवेत्यलम्[6]।

**"सप्तमीपञ्चम्यौ कारकमध्ये"** (पा०सू० २.३.७) इति सूत्रे 'शक्तिः कारकम्' इति पक्षस्य भाष्ये दर्शनात्। एवञ्च 'देवदत्तस्य गौर्ब्राह्मणाय गेहाद् गङ्गायां हस्तेन मया दीयते' इत्यत्र देवदत्तसम्बन्धिनी या गौस्तदभिन्नाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गेहनिष्ठविभागजनको गङ्गाधिकरणो[7] हस्तकरणको मन्निष्ठो व्यापार इति बोधः। यथायथम् - उक्तप्रकारेण। अत्र मानमुपदर्शयन् **'घटं जानाति' इत्यादौ द्वितीयाया विषयतया[8] लक्षणेति बह्वाकुलं वदतो नैयायिकादीन्** प्रत्याह-सुपां कर्मेति।

अयं भावः -

> **सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्।**
>
> **प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु च ॥**

इति **वार्तिकतद्भाष्या**भ्यां कर्मादिस्तद्वाच्यतायास्तन्नियमस्य च लाभः। तथा हि - **"स्वौजसमौट्०।"** (पा०सू० ४.१.२) **"कर्मणि द्वितीया।"** (पा०सू० २.३.२) इति, **"द्व्येकयोर्द्विवचने०।"** (पा०सू० १.४.२२) इत्यादेः, **"लस्य।"** (पा०सू० ३.४.७७) **"तिप्तस्झि०।"** (पा०सू० ३.४.७८), **"तान्येकवचनद्विवचन०।"** (पा०सू० १.४.१०२) इत्यादेरेकवाक्यतया कर्मादिस्तत्सङ्ख्यायाश्च वाच्यता लभ्यते तथा तन्नियमश्च द्विविधो लभ्यते। - द्वितीया कर्मण्येव, तृतीया करणे एवेत्येवमादिः शब्दनियमः[9]। कर्मणि द्वितीयैव, करणे तृतीयैवेत्येवमर्थनियमश्च[10]। उभयथाऽपि सिद्धनियमविरुद्धं लक्षणादिकमसाधुत्व - प्रयोजकमिति याज्ञे कर्मणि **'नानृतं वदेत्'** इति निषेधविषयो भवत्येवेति स्वेच्छया लक्षणाऽपि विभक्तावप्रयोजिकैव। अत एव **'विभक्तौ न लक्षणा'** इत्यादिर्नैयायिकवृद्धानां व्यवहार इति दिक् ॥२४॥

## इति वैयाकरणभूषणसारे सुबर्थनिरूपणम्।

## ।।अथ नामार्थनिर्णयः।।

---

[6] शक्तिरेवेत्यूह्यम् - in Madhusūdan Penna's edition, p. 270 and Brahmadatta's edi. P. 180

[7] गङ्गाधिकरणको - in Madhusūdan Penna's edition, p. 270 and Brahmadatta's edi. P. 183

[8] विषयतायां - in Madhusūdan Penna's edition, p. 270 and Brahmadatta's edi. P.183

[9] अर्थनियमः - in Madhusūdan Penna's edition, p. 270

[10] शब्दनियमः - in Madhusūdan Penna's edition, p. 270

नामार्थमाह -

**एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।**

**नामार्थ इति सर्वेऽमि पक्षाः शास्त्रे निरूपिताः ॥२५॥**

एकम् = जातिः, लाघवेन तस्या एव वाच्यत्वौचित्यात्, अनेकव्यक्तीनां वाच्यत्वे गौरवात्। न च व्यक्तीनामपि प्रत्येकमेकत्वाद्विनिगमनाविरहः। एवं ह्येकस्यामेव व्यक्तौ शक्त्यभ्युपगमे व्यक्त्यन्तरे लक्षणायां स्वसमवेताश्रयत्वं संसर्ग इति गौरवम्। जात्या तु सहाश्रयत्वमेव संसर्ग इति लाघवम्।

किञ्चैवं विशिष्टवाच्यत्वमपेक्ष्य नागृहीतविशेषणन्यायाज्जातिरेव वाच्येति युक्तम्, व्यक्तिबोधस्तु लक्षणया। एवञ्च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यते इति दिक्।

यद्वा केवलव्यक्तिरेवैकशब्दार्थः, केवलव्यक्तिपक्षे एवाण्-ग्रहणस्यैकशेषस्य चारम्भेण तस्यापि शास्त्रसिद्धत्वात्। युक्तञ्चैतत्-व्यवहारेण व्यक्तावेव तद्ग्रहणात्। सम्बन्धितावच्छेदकस्य (सम्बन्धितावच्छेदिकायाः) जातेरैक्याच्छक्तिरप्येकैवेति न गौरवमपि।

न चैवं घटत्वमपि वाच्यं स्यात्, शक्यतावच्छेदकत्वात्, तथा च 'नागृहीतविशेषणन्यायात्' तदेव वाच्यमस्त्विति शङ्क्यम्, अकारणत्वेऽपि कारणतावच्छेदकत्ववत्, अलक्ष्येऽपि लक्ष्यतावच्छेदकत्ववत्तथात्रापि सम्भवात्।

उक्तञ्च-

**आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।**

**शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति ॥ इति ॥**

वस्तुतस्तु **"न ह्याकृतिपदार्थस्य द्रव्यं न पदार्थः"** इति **भाष्या**द्विशिष्टं वाच्यम्। एकमित्यस्य चायमभिप्रायः - शक्तिज्ञाने च विषयतयाऽवच्छेदिका जातिरेकैव। तथा च घटत्वविशिष्टे[11]बोधे घटत्वांशेऽन्याप्रकारकघटत्वशक्तिज्ञानत्वेन हेतुतेति कार्यकारणभाव इत्यादि **प्रपञ्चितं भूषणे**। तदेतदभिप्रेत्याह-द्विकमिति-जातिव्यक्ति इत्यर्थः। पूर्वपक्षाद् विरोधपरिहारः पूर्ववत्।

त्रिकमितिजातिव्यक्तिलिङ्गानीत्यर्थः। सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्। आधिक्यं पुंस्त्वम्, अपचयः स्त्रीत्वम्। तत्तच्छब्दनिष्ठं तत्तच्छब्दवाच्यञ्च तमेव विरुद्धधर्ममादाय तटादिशब्दा भिद्यन्ते।

केषाञ्चिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात्। एवञ्च पदार्थपदे पुंस्त्वमेव। व्यक्तिपक्षे स्त्रीत्वमेव। वस्तुपदे नपुंसकत्वमेव इति सर्वत्रैव 'अयं पदार्थः' 'इयं व्यक्तिः' 'इदं वस्तु' इति व्यवहारः, तटः, तटी, तटमिति चोपपद्यते।

---

[11] घटत्वप्रकारकविशिष्टे - in Madhusūdan Penna's edition, p. 330 and Śāstri's edi, p. 314 and Ananta Śāstri's edi. P.195

तच्च लिङ्गमर्थपरिच्छेदकत्वेनान्वेतीति पश्वादिशब्दोक्तम् - 'पशुः स्त्रियां नास्ति' इति 'पशुना' इत्यादिविधिर्न च्छाग्यादीनङ्गत्वेन प्रयोजयतीति विभावनीयम्। न च व्यक्त्यादिशब्दोक्तलिङ्गस्येव पश्वादिशब्दोक्तस्यापि साधारण्यं शङ्क्यम्, व्यक्तिशब्दस्य नित्यस्त्रिलिङ्गत्वेन तथा सम्भवेऽपि पशुशब्दस्य नित्यपुंल्लिङ्गत्वेन प्रमाणाभावात्।

**"पश्वा न तायुं गुहा चरन्तम्।"** (ऋ.वे.म.१,अनु.१२,सू.६५), **"पश्वे नृभ्यो यथा गवे"** (ऋ.वे.अ.१, अ.३,व.२६) इत्यादि **वेदे दर्शनाच्च**। **मीमांसायां** चतुर्थे 'पशुना यजेत' इत्यत्रैकत्वपुंस्त्वयोर्विवक्षितत्वान्नानेकपशुभिः पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च।

वस्तुतस्तु विशेषविध्यभावे प्रत्ययान्तानां पुंस्त्वस्य व्याकरणेन निर्णीतत्वा**द्वेदभाष्ये**ऽपि **"जसादिषु च्छन्दसि वा वचनम्"** इति नाभावाभाव इत्युक्तेः पशुशब्दस्य नित्यपुंस्त्वनिर्णयात्। प्रकृते "छागो वा मन्त्रवर्णात्" इति **न्याये**नैव निर्णयः। मन्त्रवर्णे हि "च्छागस्य वपाया मेदसः" इति श्रूयते। तत्र च्छागस्येति च्छाग्यामसम्भावितम्, इति भवति ततः पुंस्त्वनिर्णय इति विस्तरेण **प्रपञ्चितं भूषणे**।

**चतुष्कम्-सङ्ख्यासहितं त्रिकमित्यर्थः।**

**पञ्चकम्-कारकसहितं चतुष्कमित्यर्थः॥**

नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यम्, तत एव लिङ्गादीनामुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्चेति सत्यम्, प्रत्ययवर्जिते 'दधि-पश्यति' इत्यादौ प्रत्ययमजानतोऽपि बोधात् प्रकृतेरेव वाचकत्वं कल्प्यते, लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्च। अत एवैषु पक्षेषु न निर्बन्धः (प्रत्ययस्यैव वाचकताया युक्तत्वात्)।

**"द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः"॥**

इति **वाक्यपदीये** पक्षद्वयस्य व्युत्पादनात्। शास्त्र इति-बहुषु स्थलेषु व्युत्पादनं व्यञ्जयितुम्, प्राधान्येन तु सरूपसूत्रादौ व्यक्तम् ॥१॥

शब्दस्तावच्छाब्दबोधे भासते-

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥**

इत्याद्यभियुक्तोक्तेः।

'विष्णुमुच्चारय' इत्यादावर्थोच्चारणासम्भवेन विना शब्दविषयं शाब्दबोधासङ्गतिश्चेति सोऽपि प्रातिपदिकार्थः।

न च लक्षणया निर्वाहः, निरूढलक्षणायाः शक्त्यनतिरेकात् 'जबगडदशमुच्चारय' इत्यादौ शक्त्याग्रहेण शक्यसम्बन्धरूपलक्षणाया अग्रहाच्च।

अज्ञातायाश्च वृत्तेरनुपयोगात् 'गावमुच्चारय' इति भाषाशब्दानामनुकरणे साधुतासम्प्रतिपत्तेः, तेषां शक्त्यभावेन परनये लक्षणाया असम्भवाच्चेत्यभिप्रेत्य षोढाऽपि क्वचित् प्रातिपदिकार्थ इत्याह -

**शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा।**

**नोचेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थो व भासते ॥२६॥**

यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः। यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोऽप्यर्थवद्भासते। अपिर्हेतौ, उपस्थितत्वाद्भासते इत्यर्थः। अयं भावः - अनुकार्या - नुकरणयोर्भेदेऽनुकार्यस्य पदानुपस्थितत्वात् तत्सिद्धये शक्तिरुपेया, अभेदे प्रत्यक्षे विषयस्य हेतुत्वात् स्वप्रत्यक्षरूपां पदजन्योपस्थितिमादाय शाब्दबोधविषयतोपपत्तिरिति।

यद्यप्यतिप्रसङ्गवारणाय वृत्तिजन्यपदोपस्थितिरेव हेतुः, तथाप्यत्राश्रयतया वृत्तिमत्त्वस्य सत्त्वान्नानुपपत्तिः। निरूपकताश्रयतान्यतरसम्बन्धेन वृत्तिमत एव शाब्दबोधविषयत्वं कल्प्यते इत्यनवद्यम्, सम्बन्धस्योभयनिरूप्यत्वात् पदादर्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसम्भवाच्चेति।

उक्तञ्च **वाक्यपदीये** -

**ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।**

**तथैव सर्वशब्दानामेते पृथगवस्थिते ॥** इति,

**विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाशते।** इति चेति।

प्रसङ्गादनुकार्यानुकरणयोरभेदपक्षे साधकमाह-

**अत एव गवित्याह भू सत्तायामितीदृशम्।**

**न प्रातिपदिकं नापि पदं साधु तु तत्स्मृतम् ॥२७॥**

"गवित्ययमाह" **"भू सत्तायाम्"** इत्येवमादयो यतोऽनुकरणशब्दा अनुकार्य्यान्न भिद्यन्ते। अतस्तेषामर्थवत्त्वाभावात् **"अर्थवदधातु०"** (पा०सू० १.२.४५) इत्याद्यप्रवृत्तौ न प्रातिपदिकत्वम्, नापि पदत्वम्, अथ च साधुत्वमुपपद्यते। अन्यथा **"प्रत्ययः।"** (पा०सू० ३.१.१) **"परश्च।"** (पा०सू० ३.१.२) **'अपदं न प्रयुञ्जीते'ति** निषेधादिलङ्घनादसाधुतापत्तिरित्यर्थः ॥२७॥

**इति वैयाकरणभूषणसारे नामार्थनिर्णयः ॥**

## ।। अथ समासशक्तिनिर्णयः ।।

समासान् विभजते-

**सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा ।**

**सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः ॥२८॥**

सुपां सुपा - पदद्वयमपि सुबन्तम्। राजपुरुष इत्यादिः। सुपां तिङा-पूर्वपदं सुबन्तमुत्तरपदं तिङन्तम्। पर्य भूषयत्[12], अनुव्यचलत्। **"गतिमतोदात्तवता तिङाऽपि समासः"**। इति वार्त्तिकात् समासः। सुपां नाम्ना - 'कुम्भकारः' इत्यादिः। **'उपपदमतिङ्'** (पा०सू० २.२.१९) इति समासः। स च **"गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः"** इति परिभाषया भवति सुबुत्पत्तेः प्राक्। अत्रोत्तरपदे सबुत्पत्तेः प्रागित्यर्थात्। अन्यथा 'चर्मक्रीति' इत्यादौ नलोपानापत्तेः,

सुपां धातुना- उत्तरपदं धातुमात्रं न तिङन्तम् । कटप्रूः, आयतस्तूः **"क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजूश्रीणां-दीर्घश्च"** इति वार्त्तिकात्। तिङां तिङा- 'पिबतखादता' 'पचतभृज्जता' इत्यादिः। **'आख्यातमाख्यातेन क्रियासातत्ये'** इति **मयूरव्यंसकाद्यन्तर्गण**सूत्रात्। तिङां सुबन्तेन - पूर्वपदं तिङन्तमुत्तरं सुबन्तम्। जहिस्तम्बः, **"जहि कर्मणा बहुलमामीक्ष्ण्ये कर्त्तारञ्चाभिदधाति"** इति **मयूररव्यंसकाद्यन्तर्गण**सूत्रात्।

अयं षड्विधोऽपि समासः, **"सह सूपा।"** (पा०सू० २.१.४) इत्यत्र योगविभागेन भाष्ये व्युत्पादितः, स्पष्टः **शब्दकौस्तुभादौ** ॥२८॥

स्वयं भाष्यादिसिद्धं तद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्याव्याप्त्यतिव्याप्तिदिभिस्तल्लक्षणस्य प्रायिकत्वं दर्शयति -

**समासस्तु चतुर्धेति प्रायोवादस्तथा परः ।**

**योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च ॥२९॥**

**भौतपूर्व्यात्सोऽपि रेखागवयादिवदास्थितः ॥**

चतुर्धा - अव्ययीभाव-तत्पुरुष-द्वन्द्व-बहुव्रीहि-भेदात्। अयं प्रायोवादः 'भूतपूर्वः' 'दृन्भूः' 'काराभूः' 'आयतस्तूः' 'वागर्थाविव' इत्याद्यसङ्ग्रहात्।

तथा पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। उभयपदार्थप्रधानो द्वन्द्वः। अन्यपदार्थप्रधानो बहुव्रीहिरित्यादिलक्षणमपि प्रायिकम्, 'उन्मत्तगङ्गम्' 'सूपप्रति' 'अर्धपिप्पली' 'द्वित्राः' 'शशकुशपलाशम्' इत्यादौ

---

[12] पर्यभूषत् - in Madhusūdan Penna's edition, p. 364 and Śāstri's edi. p. 336 and Anata Śāstri's edi.p 213

परस्परव्यभिचारात्। तथा हि- 'उन्मत्तगङ्गम्' इत्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः, अन्यपदार्थ प्राधान्याद् बहुव्रीहिलक्षणातिव्याप्तिश्च, **"अन्यपदार्थे च संज्ञायाम्।"** (पा०सू० २.१.२१) इति समासात्। 'सूपप्रति' इत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च **"सुप्प्रतिना मात्रार्थे।"** (पा०सू० - २.१.९) इति समासात्।'अर्धपिप्पली' इति तत्पुरुषे पूर्वपदार्थ प्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च, **"अर्धं नपुंसकम्।"** (पा०सू० २.२.२) इति समासात्।

एवं 'पूर्वकायः' इत्यादौ द्रष्टव्यम्। 'द्वित्राः' इति बहुव्रीहावुभयपदार्थप्राधान्याद् द्वन्द्वातिव्याप्तिः, बहुव्रीह्यव्याप्तिश्च। 'शशकुशपलाशम्' इत्यादिद्वन्द्वे समाहारान्यपदार्थप्राधान्याद् बहुव्रीह्यतिव्याप्तिः, द्वन्द्वातिव्याप्तिश्च स्यादिति भावः। सिद्धान्ते तु "अव्ययीभावाधिकारपठितत्वमव्ययीभावत्वम्" इत्यादि द्रष्टव्यम्। असम्भवश्चैषामित्याह-भौतपूर्व्यादित्यादि रेखागवयादिनिष्ठलाङ्गूलादेवास्तवपश्व लक्षणत्वदेतेषामपि न समासलक्षणत्वम्। बोधकता तु तद्वदेव स्यादिति भावः ॥21॥

ननु पूर्वपदार्थप्राधान्यादि समासे सुवचम्। तथा हि - **"समर्थः पदविधिः।"** (पा०सू० २.१.१) इत्यादिसूत्रे भाष्यकारैरनेकधोक्तेष्वपि पक्षेषु जहत्स्वार्थाऽजहत्स्वार्थपक्षयोरेवैकार्थीभाव- व्यपेक्षारूपयोः पर्यवसानं लभ्यते। तत्राजहत्स्वार्थापक्षे उक्तव्यवस्था नासंभविनीत्याशङ्कां मनसि कृत्याह -

**जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ॥३०॥**

**भेदः संसर्ग उभयं चेति वाच्यव्यवस्थितेः ।**

जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था। पदे वर्णवद् वृत्तौ पदानामानर्थक्यमित्यर्थः। अयं भावः - समासशक्त्यैव राजविशिष्टपुरुषभानसम्भवे न राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम्, वृषभयावकादिपदेषु वृषादिपदानामिव। अन्यथा राजपदेन विग्रहवाक्ये इव, राज्ञः स्वातन्त्रेणोपस्थितिसत्त्वादृद्धस्य राज्ञः पुरुषः 'ऋद्धस्य राजपुरुषः' इत्यस्याप्यापत्तेरिति।अजहदिति - न जहति पदानि स्वार्थं यस्यां साऽजहत्स्वार्था।अयमभिप्रायः - राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः, कल्पकाभावात्, क्लृप्तराजादिपदादेवार्थोपस्थितिसम्भवे तत्कल्पनस्य गौरवपराहतत्वाच्च। क्लृप्तशक्तित्यागोऽप्यप्रामाणिकः कल्प्येत। तथा चाऽऽकाङ्क्षादिवशात् क्लृप्तशक्त्यैव विशिष्टार्थबोधः। अयमेव व्यपेक्षापक्षो मतान्तरत्वेन भाष्यकारैरुक्तः।

न चात्र मते समासे 'ऋद्धस्य' इति विशेषणान्वयापत्तिः, **'सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो न'** इति **वार्तिकात्**। तथा चैतन्मतवादिनां पूर्वोत्तरपदार्थसत्त्वात्पूर्वपदार्थप्रधान इत्यादिव्यवस्था सूपपादेति भावः।

प्रसङ्गाद् वृत्तिभेदमपि निरूपयति - ते पुनरिति। द्वे अपि वृत्ती त्रिविधे, वाच्यत्रैविध्यात्।

वाच्यमेवाह - भेद इत्यादि। भेदोऽन्योऽन्याभावः तथा च 'राजपुरुषः' इत्यादावराजकीयभिन्न इति बोधः। अस्यावाच्यत्वे च 'राजपुरुषः सुन्दरः' इति वद्राजपुरुषो देवदत्तस्य चेत्यपि स्यात्। वाच्यत्वे तद्विरोधान्नैवं प्रयोग इति भावः। राजसम्बन्धवानित्येव शाब्दभानम्, भेदस्तूत्तरकालमुपतिष्ठत इत्याशयेनाह-संसर्ग इति।

विनिगमनाविरहम्, अस्वामिकेऽपि राजपुरुष इत्यादिप्रयोगापत्तिं च मनसि कृत्वोभयं वाच्यमित्याह - उभयं वेति। तथा चाराजकीयभिन्नो राजसम्बन्धवांश्चायमिति बोधः ॥३०॥

व्यपेक्षावादस्यैवं युक्तिभाष्यविरुद्धत्वात्तन्मूलकः 'पूर्वपदार्थप्रधानः' इत्याद्युत्सर्गोऽप्ययुक्तः, किन्तु **'रेखागवय' न्यायेनो**त्सर्गोऽपि परस्परयैव बोधक इत्याशयेन समाधत्ते -

**समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ॥३१॥**

**बहूनां वृत्तिधर्माणां वचनैरेव साधने**

**स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः ॥३२॥**

समास इति वृत्तिमात्रोपलक्षणम्। **"समर्थः पदविधिः।"** (पा०सू० २.१.१) इत्यत्र पदमुद्दिश्य यो विधीयते समासादिः स समर्थ इति विग्रहवाक्याभिधाने शक्तः सन् साधुरिति सूत्रार्थस्य **भाष्याल्ला**भात्। पदोद्देश्यकविधित्वं च - कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव। विशिष्टशक्त्यस्वीकर्तॄणां व्यपेक्षावादिनां मते दूषणं शक्तिसाधकमेवेत्याशयेनाऽऽह - पङ्कजशब्दवदिति। पङ्कजनिकर्त्तुरपि योगादेवोपस्थितौ तत्रापि समुदायशक्तिर्न सिद्ध्येत्।

न च पद्मत्वरूपेणोपस्थितये सा कल्प्यत इति वाच्यम्, चित्रग्वादिपदेऽपि स्वामित्वेनोपस्थितये तत्कल्पनावश्यकत्वात्। लक्षणयैव तथोपस्थितिरिति चेत्, पङ्कजपदेऽपि सा सुवचा। एवं रथकारपदेऽपि तथा च 'वर्षासु रथकारोऽग्निमादधीत' इत्यत्रापि विना लक्षणां क्लृप्तयोगेन ब्राह्मणादिविषयतयोपपत्तौ तत्कल्पनां कृत्वा जातिविशेषस्याधिकारित्वं प्रकल्प्यापूर्वविद्याकल्पनमयुक्तं स्यादिति भावः।

साधकान्तरमाह - बहूनामिति। वृत्तेर्धर्मा विशेषणलिङ्गसंख्याद्ययोगादयस्तेषां वचनैः साधने गौरवमित्यर्थः।

अयं भावः - विशिष्टशक्त्यस्वीकारे 'राज्ञः पुरुषः' इत्यत्रेण 'राजपुरुषः' इत्यत्रापि स्याद्विशेषणाद्यन्वयः, राजपदेन स्वतन्त्रोपस्थितिसत्त्वात्। विभाषावचनञ्च समासनियमवारणाय कार्यमिति।

ननु **'सविशेषणानाम्'** इति वचनान्न विशेषणाद्यन्वयः, विभाषावचनञ्च कृतमेवेत्याशङ्कां समाधत्ते - वचनैरेवेति। न्यायसिद्धमेव सूत्रम्। व्यपेक्षाविवक्षायां वाक्यस्य, एकार्थीभावे समासस्येति स्वभावादेव प्रयोगनियमसम्भवात्। सविशेषणेत्यपि विशिष्टशक्तौ राज्ञः पदार्थैकदेशतयासम्भवान्न्यायसिद्धमिति भावः।

अत एव व्यपेक्षापक्षमुद्भाव्य **"अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः, स वक्तव्यः"** इति **भाष्यकारेण** दूषणमप्युक्तम् ॥३२॥

तथा 'धवखदिरौ' 'निष्कौशाम्बिः' 'गोरथः' 'घृतघटः' 'गुडधानाः' 'केशचूडः' 'सुवर्णालङ्कारः' 'द्विदशाः' 'सप्तपर्णं' इत्यादावितरेतरयोग-निष्क्रान्त-युक्त-पूर्ण-मिश्र-सङ्घात-विकार-सुच्यप्रत्यय-लोपवीप्साद्यर्थोवाचनिको वाच्य इत्यतिगौरवं स्यादिति दूषणान्तरमाह -

**चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्।**

**कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः ॥३३॥**

आदिना 'घनश्यामः' 'हंसगमनः' इत्यादाविवादीनां पूर्वोक्तानाञ्च संग्रहः। दूषणान्तरमाह- बहुव्युत्पत्तिभञ्जनमिति। अयमाशयः - 'चित्रगुः' इत्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा।

न च तत्र लक्षणा, 'प्राप्तोदको ग्रामः' इत्यादौ तदसम्भवात्, 'प्राप्तिकर्त्रभिन्नमुदकम्' इत्यादिबोधोत्तरं तत्सम्बन्धिग्रामलक्षणायामपि 'उदककर्तृकप्राप्तिकर्मग्रामः' इत्यर्थालाभात्।

प्राप्नोतिक्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेत्तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय-व्युत्पत्तेरुदकाभिन्नप्राप्तिकर्मेति स्यात्। अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः। प्राप्तेर्धात्वर्थतया कर्तृतासम्बन्धेन भेदेनोदकस्य तत्रान्वयासम्भवाच्च। अन्यथा 'देवदत्तः पच्यते', इत्यत्र कर्तृ-तासम्बन्धेन देवदत्तस्यान्वयसंभवेनानन्वयानापत्तेः।

अथोदकाभिन्नकर्तृका प्राप्तिरिति बोधोत्तरं तत्संबन्धिग्रामो लक्ष्यत इति चेन्न । प्राप्तेर्धात्वर्थतया क्तार्थकर्त्तारं प्रति विशेष्यताया असंभवात् । प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमिति व्युत्पत्तेः। प्राप्तपदे प्राप्तेर्वि शेष्यत्वे तस्या एव नामार्थत्वेनोदकेन सममभेदान्वयापत्तेश्च। एवम् - 'ऊढरथः', 'उपहृतपशुः', 'उद्धृतौदना', 'बहुपाचिका' इत्यादावपि द्रष्टव्यम्। अत्र हि रथकर्मकवहनकर्त्ता, पशुकर्मकोपहरणोद्देश्यः, ओदनकर्म-कोद्धरणावधिः, बहुपाककर्त्रधिकरणमिति बोधाभ्युपगमात्। अतिरिक्तशक्तिपक्षे च घटत्वविशिष्टे घटपदस्योदककर्तृकप्राप्तिकर्मत्वविशिष्टे प्राप्तोदक इत्यादिसमुदायशक्त्यैव निर्वाह इति भावः ॥३३॥

साधकान्तरमाह -

**अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्यन्तरकल्पना।**

**क्लृप्तत्याग[13]श्चास्ति तव तत्किं शक्तिं न कल्पयेः ॥३४॥**

अयं भावः - चित्रगुरित्यादिषु चित्रगवीणां स्वाम्यादिप्रतीतिर्न विना शक्तिमुपपद्यते। न च तत्र लक्षणा। सा हि न चित्रपदे, चित्रस्वामी गौरिति बोधापत्तेः। नापि गोपदे, 'गोस्वामी चित्रः' इत्यन्वयबोधापत्तेः। चित्रादिमात्रस्य लक्ष्यैकदेशत्वेन तत्र गवादेरन्वयायोगात्।

[13] क्लृप्तत्याद - in Śāstri's edi. P. 362

न च “चित्राभिन्ना गौः” इति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगोस्वामी गोपदेन लक्ष्यते इति वाच्यम्, गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासम्भवात्।

न च गोपदे साक्षात्सम्बन्ध एव विनिगमक इति वाच्यम्, एवमपि ‘प्राप्तोदकः’ ‘कृतविश्वः’ इत्याद्यषष्ठ्यर्थ बहुव्रीहौ विनिगमकाप्राप्तेः। यौगिकानां कर्त्रर्थकतया साक्षात्सम्बन्धाविशेषात्।

न च **‘पदद्वये लक्षणा’** इति **नैयायिकोक्तं** युक्तम्, बोधावृत्तिप्रसङ्गात्। न च परस्परं तात्पर्यग्राहकत्वादेकस्यैवेकदा लक्षणा, न द्वयोरिति न बोधावृत्तिरिति वाच्यम्, एवमपि विनिगमनाविरहतादवस्थ्येन लक्षणाया असम्भवात्।

न च चरमपदे एव सा, प्रत्ययार्थान्वयानुरोधात्, प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम्, एवं हि बहुव्रीह्यसम्भवापत्तेः। **“अनेकमन्यपदाथे।”** (पा०सू० २.२.२४) इत्यनेकसुबन्तानामन्यपदार्थ प्रतिपादकत्वेन तद्विधानात्।

किञ्चैवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात्, पूर्वपूर्ववर्णानां तात्पर्यग्राहकत्वेनोपयोगसम्भवात्। एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेद्, अत्राप्युदकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्यत्र विस्तरः।

एवं चाषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना, उक्तयुक्तेः। अगत्या शक्त्यन्तरकल्पना, क्लृप्तत्यागः, क्लृप्तशक्त्योपपत्तिरिति व्यत्पत्तित्यागश्च तवास्ति। तत् किं सर्वत्र समासे शक्तिं न कल्पयेदिति वाक्यार्थः। यत्तु **व्यपेक्षावादिनो नैयायिकमीमांसकादयः - न समासे शक्तिः**, ‘राजपुरुषः’ इत्यादौ राजपदादेः सम्बन्धिलक्षणयैव ‘राजसम्बन्ध्यभिन्नः पुरुषः’ इति बोधोपपत्तेः। अत एव राज्ञः पदार्थैकदेशतया न तत्र ‘शोभनस्य’ इत्यादिविशेषणान्वयः।

न वा घनश्यामः, निष्कौशाम्बिः, गोरथ इत्यादाविवादिप्रयोगापत्तिः, उक्तार्थतयैव क्रान्तादिपदप्रयोगासम्भवात्। न वा **“विभाषा।”** (पा०सू० २.१.११) इति सूत्रावश्यकत्वम्, लक्षणया ‘राजसम्बन्ध्यभिन्नः पुरुषः’ इति बुबोधयिषायां समासस्य, राजसम्बन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसम्भवात्। नापि पङ्कजपदप्रतिबन्दी शक्तिसाधिका, तत्रावयवशक्तिमजानतोऽपि बोधात्।

न च शक्त्यग्रहे लक्षणया तेभ्यो विशिष्टार्थप्रत्ययः सम्भवति। अत एव राजादिपदशक्त्यग्रहे ‘राजपुरुषः’ ‘चित्रगुः’ इत्यादौ न बोधः। न च चित्रगुरित्यादौ लक्षणासंभवेऽप्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया असंभवे बहुव्युत्पत्तिभञ्जनापत्तेरिति वाच्यम्, प्राप्तोदक इत्यादावुदकपद एव लक्षणास्वीकारात्। पूर्वपदस्य यौगिकत्वेन तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात्, प्रत्ययानां सन्निहितपदार्थगस्वार्थ बोधकत्वव्युत्पत्त्यनुरोधाच्च।

घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते, विशिष्टस्यैव सङ्केतितत्वात्। बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात्। प्रकृते चात्यन्तसन्निधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपद एव सा कल्प्यत इति विशेषः। स्वीकृतञ्च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकमन्यैरित्याहुः।

अत्रोच्यते - समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात्, अर्थवत्त्वाभावात्। **"अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।"** (पा०सू० १.२.४५) इत्यस्याप्रवृत्तेः। न च **"कृत्तद्धितसमासाश्च।"** (पा०सू० १.२.४६) इत्यत्र समासग्रहणात् सा, तस्य नियमार्थताया भाष्यसिद्धताया **वैयाकरणभूषणे** स्पष्टं प्रतिपादितत्वात्। समासवाक्ये शक्त्यभावेन शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवेन लाक्षणिकार्थवत्वस्याप्यसम्भवात्।

अथ **"तिप्तस्झि०"** इत्यारभ्य **"ङ्योस्सुप्"** इति तिप्प्रत्याहारो भाष्यसिद्धः, तमादाय **'अतिप्प्रातिपदिकम्'** इत्येव सूत्र्यताम्, कृतमर्थवदादिसूत्रद्वयेन। समासग्रहणञ्च नियमार्थमस्तु। तथा च अतिप्=सुप्तिङन्तभिन्नं प्रातिपदिकमित्यर्थात् समासस्यापि सा स्यादिति चेत्तथापि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वेन समासाव्याप्तितादवस्थ्यमेव। तथा च प्रातिपदिकसंज्ञारूपं कार्यमेवार्थवत्त्वमनुमापयति धूम इव वह्निम्।

किञ्चैवं 'चित्रगुमानय' इत्यादौ कर्मत्वाद्यनन्वयापत्तिः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः। विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात्। यत्तु सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव कल्प्यत इति तन्न, 'उपकुम्भम्' 'अर्धपिप्पली' इत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात्।

न च तत्रापि सन्निधानमेव, आनुशासनिकसन्निधेर्विवक्षितत्वात्। तथा च यत्पदोत्तरं याऽनुशिष्टा सा तदर्थगतं स्वार्थं बोधयति। समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यम्, अर्थवत्सूत्रेण विशिष्टस्यैव प्रातिपदिकत्वेन विशिष्टोत्तरं विभक्त्यनुशासनात्।

अथ 'प्रकृतित्वाश्रये विभक्त्यर्थान्वयः' इत्येव कल्प्यत इति चेत्तर्हि 'पङ्कजमानय' 'दण्डिनं पश्य' 'शूलिनं पूजय' इत्यादौ पङ्क-दण्ड-शूलेष्वानयन-दर्शन-पूजनादेरन्वयप्रसङ्गात्, 'अघटमानय' इत्यत्र घटेऽप्यानयनान्वयापत्तेश्च।

न च दण्डादीनां विशेषणतया न तत्रानयनाद्यन्वयः, पाकान्नीलः, धर्मात्सुखी इत्यादौ पाकधर्मादिजन्यताया रूपसुखादावनन्वयप्रसङ्गात्। यच्च प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रम्, तच्चात्राविरुद्धमिति तन्न, 'घटं पश्य' इत्यत्र घटपदात् समवायेनोपस्थिताकाशवारणाय वृत्त्या प्रकृत्यर्थत्वस्यावश्यकत्वात्।

अथ प्रत्ययप्राग्वर्त्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमिति चेन्न, गामानयति कृष्णो दण्डेनेत्यत्र कृष्णे तृतीयार्थान्वयप्रसङ्गात्। अत्र समस्यमानपदार्थगतस्वार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इति चेत् तन्न, अक्लृप्तकल्पनां क्लृप्तव्युत्पत्तित्यागं चावेक्ष्य समुदायशक्तिकल्पनस्यैव युक्तत्वादिति दिक्।

अपि च समासे विशिष्टशक्त्यस्वीकारे 'राजपुरुषः' 'चित्रगुः' 'नीलोत्पलम्' इत्यादौ सर्वत्रानन्वयप्रसङ्गः, राजपपादेः सम्बन्धिनि लक्षणायामपि 'तण्डुलः पचती'त्यादौ कर्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुताया आवश्यकत्वात्, पुरुषादेस्तथात्वाभावात्।

'तण्डुलः शुभ्रः' इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तण्डुलादेस्तस्य च शुक्लेऽभेदेनैवान्वयः। शुभ्रेण तण्डुलेनेत्यादौ च विशेषणविभक्तिरभेदार्थिका, पार्ष्णिको वाऽन्वय इति नातिप्रसङ्गः। तथा च समासे परस्परमन्वयासम्भवादावश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः।

किं च 'राजपुरुषः' इत्यादौ संबन्धिनि सम्बन्धे वा लक्षणा? नाद्यः, 'राज्ञः, पुरुषः' इति विवरणविरोधात्, समाससमानार्थकवाक्यस्यैव विग्रहत्वात्। अन्यथा तस्माच्छक्तिनिर्णयो न स्यात्। नान्त्यः 'राजसम्बन्धरूपपुरुषः' इति बोधप्रसङ्गात्। विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपाश्चितं **वैयाकरणभूषणे**।

अत एव 'वषट्कर्त्तुः प्रथमभक्षः' इत्यत्र न भक्षमुद्दिश्य प्राथम्यविधानं युक्तम्, एकप्रसरताभङ्गापत्तेरिति तृतीये "त्र्यङ्गैः स्विष्टकृतं यजति" इत्यत्राङ्गानुवादेन त्रित्वविधानं न युक्तम्, एकप्रसरताभङ्गापत्तेरिति दशमे च निरूपितं संगच्छते। संगच्छते चारुणाधिकरणारम्भः। अन्यथा 'अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणति' इत्यत्रारुणपदवदितरयोरपि एकाब्दत्वादिगुणमात्रवाचकतया अमूर्त्तत्वात् क्रीणातौ करणत्वासम्भवस्य तुल्यत्वादारुण्यस्यैव वाक्याद्भेदशङ्काया असम्भवादिति **प्रपञ्चितं भूषणे**। तस्मात्समासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेय इत्यास्तां विस्तरः ॥३५॥

'राजपुरुषः' इत्यादौ राज चासौ पुरुषश्चेति विग्रहः। 'चित्रगुः' इत्यादौ च चित्राणां गवामित्येव समानार्थ त्वानुरोधात्। यद्यपि प्रथमान्तानामेव बहुव्रीहिरिति **"शेषो बहुव्रीहिः।"** (पा०सू० २.२.२३) इति सूत्राल्लभ्यते इति प्रथमान्तम्, पक्षे वाक्यं 'चित्रा गावो यस्य' इत्येवं संभवत्येव। **"षष्ठी।"** (पा०सू० २.२.८) इति समासविधानात् 'राज्ञः पुरुषः' इति च पक्षे वाक्यम्। तथापि तस्य न विग्रहत्वम्, भिन्नार्थत्वात्, किन्तूक्तस्यैवेति मीमांसकास्तान् प्रसङ्गान्निरस्यति -

**आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदर्शकम्।**

**गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः (७)॥३५॥**[14]

तद्धितकृतोर्यत्किञ्चिदर्थबोधकं विवरणमाख्यातं तत्र विपर्ययो दृष्टः। तथा हि-आक्षिकः, कुम्भकारः, इत्यत्राक्षकरणकव्यापाराश्रयः, कुम्भानुकूलव्यापाराश्रय इति बोधः।'अक्षैर्दीव्यति' 'कुम्भं करोति' इत्यत्राक्षकरणिका देवनानुकूलाभावना कुम्भोत्पत्त्यनुकूला भावनेति बोधः। कृत्यप्रत्यये कारकाणाम्, आख्याते च भावनायाः प्राधान्यं वदतो मीमांसकस्यापि गुणप्रधानभावांशव्यत्यासो न विवरणत्वबाधक इति नात्र पाक्षिकस्य 'चित्रा गावो यस्य' इत्यादेर्विग्रहत्वे बाधकमस्तीति भावः ॥३६॥

नन्वस्तूक्तरीत्या सर्वत्र समासे शक्तिः, अस्तु च तथा विग्रहस्तथापि षष्ठीतत्पुरुषकर्मधारययोः शक्तिमत्त्वाविशेषान्निषादस्थपत्यधिकरण सिद्धान्तसिद्धिर्न स्यादित्यत आह -

---

[14] This *Kārikā* originally belongs to *VP* – II.306. There is some variation in reading – आख्यातं **तद्धितार्थस्य** यत्किञ्चिदुपदर्शकम्। गुणप्रधान**भावस्य** तत्र दृष्टो विपर्ययः॥ *VP*, p. 149

**पर्यवस्यच्छाब्दबोधाविदूरप्राक्क्षणस्थितेः ।**

**शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम् (८) ॥३६॥**

पर्यवस्यंश्चासौ शाव्दबोधश्च तस्मादविदूरश्चासौ प्राक्क्षणश्च तदानीन्तनलाघवमादायाधिकरणाविरोध इत्यर्थः। अयं भावः - निषादस्थपतिपदस्य समासशक्तिपक्षे, निषादरूपे, निषादानाञ्च स्थपतौ, निषादस्वामिके पुरुषान्तरे चेत्येवं सर्वत्र शक्तत्वान्नानार्थत्वम्। तथा च "नानार्थे तात्पर्याद् विशेषावगतिः" इति न्यायेन तत्कल्पनायां पदद्वयेन पूर्वोपस्थितार्थे एवोपस्थित्यादिलाघवात् तत् कल्प्यत इति। परेषामपि सति तात्पर्ये 'यष्टीः प्रवेशय' इतिवल्लक्षणाया दुर्वारत्वात्, तात्पर्यमेव कल्प्यकोटाववशिष्यत इति दिक् ॥३६॥

**इति वैयाकरणभूषणसारे समासशक्तिनिरूपणम् ॥५॥**

## ।।शक्तिनिर्णयः।।

शक्तिप्रसङ्गात् तस्याः स्वरूपमाह -

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥३७॥**[१५]

इन्द्रियाणाम्=चक्षुरादीनाम्, स्वविषयेषु=चाक्षुषेषु घटादिषु, यथाऽनादिर्योग्यता= तदीयचाक्षुषादिकारणता, तथा शव्दानामपि अर्थैः सह तद्बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थः।

ननु न बोधकारणत्वमनादिभूतं शक्तिः, आधुनिकदेवदत्तादिपदे तदभावात्। अन्यथा पित्रादीनां सङ्केताज्ञानेऽप्यन्वयबोधप्रसङ्गः, लाक्षणिकातिव्याप्तेश्चेति सङ्केतज्ञानमपि हेतुर्वाच्यम्। तथा चावश्यकत्वात्स एव शक्तिरस्तु। स चाधुनिके पित्रादेः, गवादौ चेश्वरस्येति चेत्।अत्रोच्यते संकेतो न स्वरूपेण हेतुः, अगृहीतशक्तिकादर्थबोधप्रसङ्गात्। नापि सामान्यतो ज्ञातः, प्रमेयत्वादिना तज्ज्ञानेऽपि बोधप्रसङ्गात्। नापि संकेतत्वेन तज्ज्ञानं हेतुः गवादिपदेष्वीश्वरादेः संकेतत्वेन तज्ज्ञानशून्यानां लौकिकमीमांसकादीनां तत्तदर्थबोधजनकत्वग्रहवतामेव बोधोदयेन व्यभिचारात्।

न चार्थधीजनकतावच्छेदकत्वेन तज्ज्ञानं तथा, ततोऽपि लाघवेनार्थधीजनकत्वेनैव हेतुतायामस्मत्पक्षसिद्धेः। न चाधुनिकदेवदत्तादौ सङ्केतज्ञानादेव बोधेनास्य व्यभिचारः, तत्रापि 'इदम्पदमेनमर्थं बोधयतु' इतीच्छाग्रहे पदे तदर्थ बोधकत्वस्यावगाहनेन व्यभिचाराभावात्।

---

[15] This *Kārikā* originally belongs to *VP* – III.3.29, p. 243

न च स्वातन्त्र्येणार्थबोधकताज्ञानं कारणं वाच्यम्, अन्यथा 'नेदं तद्धीजनकम्' इति ज्ञानवतः 'अस्माच्छब्दादयमर्थो बुद्ध्वाऽनेन' इति जानतस्तद्ग्रहापत्तेरिति वाच्यम्, नेदं तद्धीजनकमिति ग्रहवतो बाधेन पदे परग्रहं जानतोऽपि तद्ग्रहासम्भवात्। अन्यथा भ्रान्तिज्ञस्यापि भ्रान्तत्वापत्तिरिति।

इदञ्चार्थधीजनकत्वं पित्रादिसंकेतज्ञानादेव गृह्यते, अतस्तज्ज्ञानात्पूर्वं न बोधः। नापि लाक्षणिकोच्छेदापत्तिः, इष्टत्वात्, शक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारण्यात्।

किञ्च प्रत्यक्षादिपदजन्योपस्थितेः शाब्दबोधानङ्गत्वाच्छाब्दबोधं प्रति शक्तिजन्योपस्थितेः, लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यम्, तथा च कार्यकारणभावद्वयकल्पने गौरवं स्यात्। अस्माकं पुनः शक्तिजन्योपस्थित्वेनैव हेतुतेति लाघवम्।

अपि च लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः, शक्तिजन्योपस्थितिं विनाऽपि लक्षणाजन्योपस्थितितः शाब्दबोधात्। न चाव्यवहितोत्तरत्वसम्बन्धेन तत्तदुपस्थितिमत्त्वं कार्य्यतावच्छेकं तत्तदुपस्थितित्वं च कारणतावच्छेकम्, अनन्तकार्यकारणभावप्रसङ्गात्। किञ्च पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वे च हेतुतेति व्यभिचारः, गौरवञ्च प्राग्वदेव द्रष्टव्यम्।

न च 'इदं पदमेतदर्थबोधकम्' इति शक्तिज्ञानेन कार्यकारणभावकल्पनेऽपि पदतदर्थभेदेनानेककार्य-कारणभावकल्पने गौरवं तवापि समानम्, परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वे च सुतरामिति वाच्यम्, शक्तिभ्रमानुरोधेन तत्तत्पदतत्तदर्थभेदेन कार्यकारणभावानन्त्यस्य तवापि साम्यात्। लक्षणाकार्यकारणभावकल्पनागौरवं परं तवातिरिच्यते।

अथ वृत्तिजन्योपस्थित्वेनैव शाब्दबोधहेतुता, वृत्तिज्ञानत्वेन च पदार्थोपस्थितिकारणतेत्येवं मया वाच्यमिति चेन्न, शक्तिलक्षणान्यतरत्वस्य, शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वस्य वृत्तित्वस्य कारणावच्छेदकत्वाच्छक्तित्वमपेक्ष्य गौरवात्, शाब्दबोधहेतुतावच्छेदकपदार्थोपस्थितिहेतुवृत्तेरज्ञाने तद्घटितकार्य कारणभावग्रहस्याप्यसम्भवात्।

अथ ममापि शक्तिज्ञानत्वेनैव हेतुता, शक्यसम्बन्धज्ञानरूपलक्षणायां शक्तेरपि प्रवेशादिति चेन्न, शक्तिज्ञानपदार्थो पस्थित्योः कार्यकारणभावे समानविषयत्वस्यावश्यकत्वात्। अन्यथा गङ्गातीरयोः सम्बन्धाग्रहवतो गङ्गापदशक्तिं जानतोऽपि 'गङ्गायां घोषः' इति वाक्यात्तीरबोधप्रसङ्गः, शक्तिज्ञानस्य हेतोः सत्त्वात्।

अपि च 'घटमानय' इति वाक्यम्, हस्तिनञ्च स्मरतः, घटपदादिभ्यो घटादेः, गजाद्धस्तिपकस्य च समूहालम्बनस्मरणवतो घटानयनवद्धस्तिपकस्यापि शाब्दबोधापत्तिः, समूहालम्बनरूपायां पदार्थोपस्थितौ वृत्तिजन्यत्वसत्त्वात्।

तथा च विषयतया 'शाब्दबोधं प्रति तदंशविषयकवृत्तिजन्योपस्थितिर्हेतुः' इति वाच्यम्। एवं च लक्षणाया अपि शक्तिज्ञानत्वेन हेतुत्वमसंभवदुक्तिकमिति। एतेन शक्तिप्रयोज्योपस्थिति- र्हेतुरिति न लक्षणाज्ञाने कार्य

कारणभावान्तरं ममापीति परास्तम्। प्रयोज्यत्वस्यानतिप्रसक्तस्य दुर्वचत्वाच्चेत्यादिकं विस्तरेण **प्रपञ्चितं भूषणे** (१) ॥ ३७॥

नन्वेनं भाषादितो बोधदर्शनाद्बोधकतारूपा शक्तिस्तत्रापि स्यात्। तथा च साधुताऽपि स्यात्, शक्तत्वस्यैव साधुताया व्याकरणाधिकरणे प्रतिपादनादित्याशङ्कां द्विधा समाधत्ते-

**असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।**

**वाचकत्वाविशेषे वा[16] नियमः पुण्यपापयोः ॥३८॥**[१७]

असाधुः=गाव्यादिः, अनुमानेन=साधुशब्दमनुमाय, वाचको बोधकः कैश्चिदिष्यते। तथा च लिपिवत्तेषां साधुस्मरण एवोपयोगः, न तु साक्षात्तद्वाचकत्वमतो न साधुत्वमिति भावः।

उक्तञ्च **वाक्यपदीये-**

**ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।**

**तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥**

**न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ।**

**न यतः स्मृतिमात्रेण तस्मात्साक्षादवाचकाः ॥**

**अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते ।**

**अव्यक्तं तद्विदां तेन व्यक्तं भवति निर्णयः ॥**

**एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।**

**तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥** इति ॥

नन्वपभ्रंशानां साक्षादवाचकत्वे किं मानम्? शक्तिकल्पकव्यवहारादेस्तुल्यत्वात्, इति चेत्, सत्यम्, तत्तद्देशभेदभिन्नेषु तेषु तेषु शक्तिकल्पने गौरवात्।

न च पर्यायतुल्यता शङ्क्या, तेषां सर्वदेशेष्वेकत्वात्, विनिगमनाविरहेण सर्वत्र शक्तिकल्पना, नह्यपभ्रंशे तथा, अन्यथा भाषाणां पर्यायतया गणनापत्तेश्च। एवञ्च **'शक्तत्वमेवास्तु साधुत्वम्'** इति **नैयायिकमीमांसकादीनां** मतेनैव द्रष्टव्यम्।

---

[16] च - in Madhusūdan Penna's edition, p. 467.
[17] This *Kārikā* originally belongs to *VP* – III.3.30, p. 244

इदानीं स्वमतमाह-वाचकत्वाविशेषे चेति। अयं भावः - अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात्। न च साधुस्मरणात्ततो बोधः, तानविदुषां पामराणामपि बोधात्, तेषां साधोरबोधाच्च।

न च शक्तिभ्रमात्तेभ्यो बोधः, बोधकत्वस्याबाधेन तदग्रहस्याभ्रमत्वात्। 'इश्वरेच्छा शक्तिः, इति मतेऽपि सन्मात्रविषयिण्यास्तस्या बाधाभावात्, शक्तेः पदपदार्थविशेषघटिताया भ्रमासम्भवाच्चेति।

उक्तञ्च **वाक्यपदीये** -

**पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।**

**प्रसिद्धिमागता येषु तेषां साधुरवाचकः ।।**

**दैवी वाग्व्यकीर्णेयमशक्तैरभिधातृभिः ।**

**अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः ।।** इति ।।

अवाचकः=अबोधकः, बुद्धिविपर्ययः=एत एव वाचका नान्ये इति विपर्यय इत्यर्थः। किञ्च विनिगमनाविरहाद्भाषायामपि शक्तिः। न च तासां नानात्वं दोषः, संस्कृतवन्महाराष्ट्रादिभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात्। किञ्चानुपूर्वी पदेऽवच्छेदिका। सा च पर्यायेष्विव भाषायामप्यन्यान्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः। तथा च संस्कृतवद्भाषायाः सर्वत्रैकत्वेन प्रत्येकं शब्दाः शक्ता एव। न च पर्यायतया भाषाणां गणनापत्तिः, साधूनामेव कोशादौ विभागाभिधानात्।

नन्वेवं साधुता तेषां स्यादित्यत आह - नियम इति। पुण्यजननबोधनाय साधूनां साधुभिर्भाषितव्यमिति विधिः, पापजननबोधनाय नासाधुभिरिति निषेधः। तथा च पुण्यजननयोग्यत्वं साधुत्वं पापजननयोग्यत्वमसाधुत्वम्। तत्र जनकतावच्छेदिका च जातिः। तज्ज्ञापकं च कोशादि, व्याकरणादि च। एवमेव च राजसूयादेर्ब्राह्मणे फलाजनकत्ववद् गवादिशब्दानां नाश्वादौ साधुत्वं संगच्छते। आधुनिकदेवदत्तादिनाम्नामपि 'द्व्यक्षरम्' इत्यादिभाष्येण व्युत्पादितत्वात्साधुत्वम्। एवं च यः शब्दो यत्रार्थे व्याकरणे व्युत्पादितः स तत्रैव साधुरिति पर्यवसितम्। गौणानां गुणे व्युत्पादनात्तत्पुरस्कारेण प्रवृत्तौ साधुत्वमेव। आधुनिकलाक्षणिकानां त्वसाधुत्वमिष्टमेव। अत एव 'ब्राह्मणाय देहि' इत्यर्थे ब्राह्मणं देहि' इत्यादिकं लक्षणयाऽपि न साधुरित्यादि विस्तरेण **प्रपञ्चितं भूषणे** ।।३८।।

अतिरिक्तशक्तिग्रहोपायमाह-

**सम्बन्धिशब्दे सम्बन्धो योग्यतां प्रति योग्यता ।**

**समयाद्योग्यता संविन्मातापुत्रादि[18]योगवत् ।।३।।३९।।**[१९]

---

[18] पित्रादि in Madhuūsan Penna's edi., p. 480 and Śāsrti's edi. p. 430.

सम्बन्धो विषयः। योग्यतां प्रति योग्यतासम्बन्धिशब्दं प्रति योग्यता विषय इति। समयात्=व्यवहारात्, योग्यता। संवित्=शक्तिग्रहः। घटपदमत्र योग्यमेतत्सम्बन्धीति व्यवहारात्सा ग्राह्येत्यर्थः ॥३९॥

## ॥ इति वैयाकरणभूषणसारे शक्तिनिर्णयः ॥

## ।।अथ नञर्थनिर्णयः।।

नञर्थमाह-

**नञ्समासे चापरस्य प्राधान्यात्सर्वनामता।**

**आरोपितत्वं नञ्द्योत्यं न ह्यसोऽप्यतिसर्ववत् ॥४०॥**

नञ्समासेऽपरस्य=उत्तरपदार्थस्य प्राधान्यात्सर्वनामता सिध्यतीति शेषः। अत एवारोपितत्वमेव, नञ्द्योत्यमित्यभ्युपेयमिति शेषः। अयं भावः-'असर्वः' इत्यादौ 'आरोपितः सर्वः' इत्यर्थे सर्वशब्दस्य प्राधान्याबाधात्सर्वनामता सिध्यति। अन्यथा 'अतिसर्वः' इत्यत्रेव सा न स्यात्, 'घटो नास्ति' इत्यादावभावविषयकबोधे तस्य विशेष्यताया एव दर्शनात्।

अस्मद्रीत्या च स आर्थो बोधो मानसः। तथा च 'असर्वस्मै' इत्याद्यसिद्धिप्रसङ्गो नेति। अत्र चारोपितत्वमारोपविषयत्वम्। आरोपमात्रमर्थो विषयत्वं संसर्ग इति निष्कर्षः। द्योत्योक्तिर्निपातानां द्योतकत्वमभिप्रेत्य ॥४०॥

'घटो नास्ति' 'अब्राह्मणः' इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात् पक्षान्तरमाह -

**अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात्।**

**विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम् ॥४१॥**

तदर्थः=नञर्थः। अर्थपदं द्योत्यत्ववाच्यत्वपक्षयोः साधारण्येन कीर्त्तनाय। भाष्यस्येति - तथा च नञसूत्रे महाभाष्यम्-निवृत्तपदार्थक इति। निवृत्तं पदार्थो यस्य **"नपुंसके भावे क्तः।"** (पा०सू० ३.१.११४) इति 'क्तः' अभावार्थक इत्यर्थः।

यत्तु निवृत्तः पदार्थो यस्मिन्नित्यर्थः। **सादृश्यादिनाऽध्यारोपितब्राह्मण्याः क्षत्रियादयोऽर्था यस्येत्यर्थ** इति **कैयटः**, तन्न, आरोपितब्राह्मणस्य क्षत्रियादेर्नञवाच्यत्वात्। अन्यथा सादृश्यादेरपि वाच्यतापत्तेः।

---

[19] This *Kārikā* originally belongs to *VP* – III.3.31. there is some variation in reading – **संबन्धशब्दे** संबन्धो योग्यतां प्रति योग्यता। समयोद्योग्यतासंविन्मातापुत्रादियोगवत् ॥ *VP*, p. 244

यत्तु-

**तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।**

**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥**

इति पठित्वाब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गोऽश्वेभ्यः, अधर्म इत्युदाहरन्ति, तत्त्वार्थिकार्थमभिप्रत्येति स्पष्टमन्यत्र। विशेषणमिति प्रतियोगिनीति शेषः। तथा चासर्वपदे सर्वनामसंज्ञा। **"अनेकमन्यपदार्थे।"** (पा०सू० २.२.२४) **'सेव्यतेऽनेकया सन्नतापाङ्ग्या'** इत्यादावेकशब्दार्थ प्राधान्यादेकवचननियमः। 'अब्राह्मणः' इत्यादावुत्तरपदार्थप्राधान्यात्तत्पुरुषत्वम्। 'अत्वं भवसि' 'अनहं भवामि' इत्यादौ पुरुषवचनादिव्यवस्था चोपपद्यते। अन्यथा त्वदभावो मदभावो इतिवदभावांशे युष्मदस्मदोरन्वयेन युष्मत्सामानाधिकरण्यस्य तिङ्क्ष्वसत्त्वात् पुरुषव्यवस्था न स्यात्। अस्मन्मते च भेदप्रतियोगित्वदभिन्नाश्रयिका भवनक्रियेत्यन्वयात्सामानाधिकरण्यं नानुपपन्नमिति भावः।

विशेष्यो वेति-प्रतियोगिनीति शेषः। अयं भावः - गौणत्वेऽपि नञ्समासे **"एतत्तदो सुलोपोऽकोरनञसमासे हलि।"** (पा०सू० ६.१.१३२) इति ज्ञापकात् सर्वनामसंज्ञा नानुपपन्ना। 'असः शिवः' इत्यत्र सुलोपवारणाय 'अनञ्समासे' इति हि विशेषणम्।

न च तत्र तच्छब्दस्य सर्वनामताऽस्ति, गौणत्वात्। 'अकोः' इत्यकच् सहितव्यावृत्त्या सर्वनाम्नोरेव तत्र ग्रहणलाभात्। तथा च 'अनञ्समास' इति ज्ञापकं सुवचम्।

'अनेकमन्यपदार्थे' इत्यादावेकवचनम्, विशेष्यानुरोधात्। **"सुबामन्त्रिते पराङ्गवत्स्वरे।"** (पा०सू० २.१.२) इत्यतोऽनुवर्तमानं सुब्ग्रहणं विशेष्यमेकवचनान्तमेव। किञ्चानेकशब्दाद् द्विवचनोपादाने, बहूनां बहुवचनोपादाने द्वयोर्बहुव्रीहिर्न सिध्येदित्युभयसंग्रहायैकवचनम्, जात्याभिप्रायिकमौत्सर्गिकं वा। 'सेव्यतेऽनेकया' इत्यत्रापि 'योषया' इति विशेष्यानुरोधात्, प्रत्येकं सेवनान्वयबोधनाय चैकवचनम्, न तदूत्तरपदार्थप्राधान्यप्रयुक्तम्। अत एव **'पतन्त्यनेके जलधेरिवोर्मयः'** इत्यादिकमपि सूपपादम्। 'अत्वं भवसि' इत्यादौ युष्मदस्मदोस्तद्भिन्ने लक्षणा नञ्द्योतकः। तथा च भिन्नेन युष्मदर्थेन तिङः सामानाधिकरण्यात् पुरुषव्यवस्था। 'त्वद्भिन्नाभिन्नाश्रयिका भवनक्रिया' इति शाब्दबोधः। एवम् 'न त्वं पचसि' इत्यत्र त्वद्भिन्नाश्रयकपाकानुकूलभावनाऽभावः। 'घटो नास्ति' इत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः, असमस्तनञः क्रियायामेवान्वयात्। स चाभावोऽत्यन्ताभावत्वायोन्याभावत्वादिरूपेण शक्यः, तत्तद्रूपेण बोधादित्यन्यत्र विस्तरः॥४१॥

## इति वैयाकरणभूषणसारे नञर्थनिर्णयः॥७॥

## ।।अथ निपातार्थनिर्णयः।।

प्रादयो द्योतकाः चादयो वाचकाः, इति नैयायिकमतमयुक्तम्, वैषम्ये बीजाभावादिति ध्वनयन्निपातानां द्योतकत्वं समर्थयते-

**द्योतकाः प्रादयो येन निपाताश्चादयस्तथा।**

**उपास्येते हरिहरौ लकारो दृश्यते यथा ॥४२॥**

येन हेतुना प्रादयो द्योतकास्तेनैव हेतुना चादयः=निपातास्तथा=द्योतका इत्यर्थः। अयं भावः - 'ईश्वरमनुभवति' इत्यादावनुभवादिः प्रतीयमानो न धात्वर्थः, 'भवति' इत्यत्राप्यापत्तेः। नोपसर्गार्थः, तथा सत्यप्रकृत्यर्थतया तत्राख्यातार्थानन्वयापत्तेः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः, 'अनुगच्छति' इत्यादौ अनुभवादिप्रत्ययापत्तेश्च। न विशिष्टार्थः, गौरवात्। तथा च धातोरेव विद्यमानत्वादिवाचकस्यास्तु लक्षणा, उपसर्गस्तात्पर्यग्राहक इत्यस्तु। तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वमिति।

एतच्च चादिष्वपि तुल्यम्। 'चैत्रमिव पश्यति' इत्यादौ सादृश्यविशिष्टं चैत्रपदलक्ष्यम्, इवशब्दस्तात्पर्यग्राहक इत्यस्य सुवचत्वादिति। तत्र स्वयं युक्त्यन्तरमाह - 'उपास्येते हरिहरौ' इति। अत्र ह्युपासना किमुपसर्गार्थः, विशिष्टस्य, धातुमात्रस्य वा। नाद्यः, तथा सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्म-कत्वस्यासधातोरुपासनारूपफलवाचकत्वाभावादना- पत्तेस्ततः कर्मणि लकारो न स्यात्। न द्वितीयः, गौरवात्। तृतीये त्वागतं द्योतकत्वम्, तात्पर्यग्राहकत्वलाभादिति भावः। 'दृश्यते' इत्यत्र 'कर्मणि' इति शेषः ॥४॥

तच्चादिष्वपि तुल्यमित्याह-

**तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः।**

**विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः ॥४३॥**

अन्यत्र='साक्षात्क्रियते' 'अलङ्क्रियते' 'ऊरीक्रियते शिवः' इत्यादौ। अत्रापि धातोस्तत्तदर्थे कर्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवद् द्योतकत्वममीषामपीत्यर्थः। यद्यपि कृधातोः सकर्म कत्वमस्त्येव, तथाप्येष्वर्थेषु सकर्मकता न स्यात्। अन्यथा 'वायुर्विकुरुते' 'सैन्धवा विकुर्वते' इत्यत्रापि स्यादिति भावः।

अथोपासना - साक्षात्कारादिर्निपातार्थोऽस्तु, 'साक्षात्प्रत्यक्षतुल्ययोः' इति कोशस्वरसात्। तदनुकूलो व्यापार एव धात्वर्थोऽस्तु। स्वस्वयुक्तनिपातान्यतरार्थ- फलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वमपि सुवचमिति दृष्टान्तदार्ष्टान्तिकावयुक्ताविति नेदं साधकमिति चेन्न, नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासम्भवेन निपातधात्वर्थ योरन्वयासम्भवात्। अन्यथा 'तण्डुलः पचति' इत्यत्रापि कर्मतया तण्डुलानां धात्वर्थे- ऽन्वयापत्तेरिति।

किञ्च प्रादीनां वाचकत्वे 'भूयान् प्रकर्षः' 'कीदृशो निश्चयः' इतिवत् 'भूयान् प्र' 'कीदृशो निः' इत्यपि स्यात्। अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वय इत्यतो द्योतकतां तेषां स्यादिति। साधकान्तरमभिप्रेत्याह-विशेषणेति। 'शोभनः समुच्चयो द्रष्टव्यः' इतिवत् 'शोभनश्चद्रष्टव्यः' इत्यस्यापत्तेस्तुल्यसमाधेयत्वादिति भावः।

अपि च निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासम्भवः। अन्यथा 'राजा पुरुषः' इत्यस्य 'राजसम्बन्धी पुरुषः' इत्यर्थापपत्तेरित्यभिप्रेत्याह - आदिति - 'धवखदिरयोः समुच्चयः' इतिवत् 'धवस्य च खदिरस्य च' इत्येव स्यादितिभावः ॥४३॥

ननु प्रातिपदिकार्थयोर्भेदेनान्वयबोधे विरुद्धविभक्तिजन्योपस्थितिर्हेतुरिति कार्यकारणभावो निपातातिरिक्तविषय एवेति नोक्तदोष इत्याशङ्क्याह -

**पदार्थः सदृशान्वेति विभागेन कदापि न ।**

**निपातेतरसंकोचे प्रमाणं किं विभावय ॥(३) ॥४४॥**

सदृशा सदृशेन समानाधिकरणेनेति यावत्। अन्वेति अभेदेनेति शेषः। विभागेन, असदृशेन, असमानाधिकरणेनेति यावत्। अयमर्थः-समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातिरिक्तविषयेति कल्पने मानाभावो गौरवं च। अस्माकं निपातानां द्योतकत्वादन्वय एव नास्तीति नायं दोषः। अत एव घटो नास्तीत्यादौ घटपदं तत्प्रतियोगिके लाक्षणिकमिति नैयायिकाः (३) ॥४४॥

अपि च निपातानां वाचकत्वे काव्यादावन्वयो न स्यादिति साधकान्तरमाह-

**शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ।**

**इत्यादावन्वयो न स्यात्सुपां च श्रवणं ततः (४) ॥४५॥**

अत्रोस्रसदृशैः शरै रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः। अयञ्चोस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य द्योतकत्वे सत्येव सङ्गच्छते। अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः।

तथाहि - उस्रैरिति करणे तृतीया। न चोस्रोऽत्र करणम्। इवार्थसदृशस्य करणत्वेऽपि तस्य करणत्वं नानेन बोधयितुं शक्यम्, अप्रकृत्यर्थत्वात्। इवशब्दस्य चासत्त्वार्थकतया तदुत्तरं तृतीयाया असम्भवात्। सम्भवे वा श्रवणप्रसङ्गात्, उस्रपदोत्तरतृतीयानन्वयप्रसङ्गाच्चेत्याह-सुपाञ्चेति। सुपां श्रवणञ्चेत्यर्थः। चकारादुस्रपदोत्तरतृतीयानन्वयः समुच्चीयते। इत्यादावित्यादिपदात् **"वागर्थाविव सम्पृक्तौ पार्वतीपरमेश्वरौ वन्दे"** इत्यत्र वागर्थयोर्वदि[20]कर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वयः, इवार्थस्य कर्मत्वबोधासम्भवश्च संगृह्यते। यदि च विशेषणविभक्तिरभेदार्था, साधुत्वमात्रार्था वा तदाऽपीवशब्दस्य वाचकत्वेऽनन्वय एव। उस्रसदृशशराणां समानाधिकरणपदोपस्थाप्यतया भेदेनान्वयायोगात्। बाधादभेदेनापि न सः। न ह्युस्राभिन्नसदृशाभिन्नः शरः इत्यर्थो द्रष्टव्यः ।(४) ॥४५॥

ननु त्वन्मते 'अब्राह्मणः' इत्यादौ तत्पुरुषलक्षणाव्याप्त्यापत्तिः, पूर्वपदस्यानर्थकत्वेनोत्तरपदार्थ- प्राधान्याभावात्। उपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद्विभक्तिश्च ततो न स्यादित्यत आह-

---

[20] वन्दिकर्म - in Madhusūdan Penna's edition, p. 510 and Brahmadatta's edi. p. 471

**नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता ।**

**द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः (५) ॥४६॥**

नञ्समासादौ योत्तरपदार्थप्रधानता सा द्योत्यमर्थमादायैव। तमेवार्थमादायार्थवत्त्वात् प्रातिपदिकत्वमित्यर्थः।

वस्तुतः **"अव्ययादाप् सुपः।"** (पा०सू० २.४.८२) इति ज्ञापकात् सुबुत्पत्तिः। **'निपातस्यानर्थकस्य'** इति वार्त्तिकाद्वा प्रातिपदिकत्वम्। **"कृतद्धितसमासाश्च।"** (पा०सू० १.२.४६) इत्यनुक्तसमुच्चयार्थकचकारेण निपातानां संग्रह इति वा बोध्यम्।तस्माद्युक्तं निपातानां द्योतकत्वम्। उक्तञ्चाकृत्यधि - करण**वार्त्तिके**

**चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः ।**

**क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः ॥**

**तयोरर्थाभिधाने हि व्यापारो नैव विद्यते ।**

**यदर्थद्योतकौ तौ तु वाचकः स विचार्यते ॥इति॥**

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।**

**प्रहाराहारसंहारविहारपरिहारवत् ॥ इति च ॥**

अत्रोपसर्गपदं[21] निपातोलक्षणम्। धातुपदं पदान्तरस्येति बोध्यम् (५) ॥४६॥

नन्वन्वयव्यतिरेकाभ्यां निपातानां तदर्थवाचकत्वमेव युक्तम्, बोधकतारूपशक्तेरबाधात्। किञ्चोक्तरीत्या 'पचति' इत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणाऽस्तु तात्पर्यग्राहकत्वमात्रं तिङादेः स्यादित्यरुचेः पक्षान्तरमाह -

**निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।**

**युक्तं वा न तु तद्युक्तं परेषां मतमेव नः ॥(६) ॥ ४७॥**

एवञ्च 'धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयबोधो न व्युत्पन्नः' इति निपातातिरिक्तविषयः। समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय इत्यपि तथेत्यगत्या कल्पनीयमिति भावः। न त्विति नैयायिकोक्तं प्रादिचादिवैषम्यमित्यर्थः।

[21] वृद्धोक्तावुपसर्गपदं - in Madhusūdan Penna's edition, p. 516.

यत्तु-सर्वेषां निपातानां वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसम्भवात् 'निपातस्यानर्थकस्य' इति विधिवैयर्थ्य म्। सर्वेषां द्योतकत्वे 'चानर्थकस्य' इति व्यर्थम्। तथा च केचिद् द्योतकाः, केचिद्वाचका इत्यभ्युपेयमिति तन्न, एवं हि "चादयो  द्योतकाः प्रादयो वाचकाः" इति वैपरीत्यावारणात्। सर्वथानर्थकानां पादपूरणमात्रार्थमुपात्तानां संग्रहाय **वार्त्तिकारम्भस्य कैयटादौ** स्पष्टत्वात्, तस्य प्रत्याख्यातत्वाच्च।

परेषामिति बहुवचनं मीमांसकसंग्रहाय। केवलवृक्षशब्दात् समुच्चयाबोधाच्चकारश्रवणे तद्बोधाच्चकार एव तद्वाचकः, न द्योतकः। किञ्च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या, चकारादेर्द्योतकत्वशक्तिश्च कल्प्येति गौरवं स्यादिति हि समुच्चयाधिकरणे स्थितम्, तदपि न युक्तमिति भावः।

तथा हि - अन्वयव्यतिरेकौ तात्पर्यग्राहकत्वेनाप्युपयुक्तौ। घटादिपदानामेव समुच्चिते लक्षणा, तात्पर्यग्राहकः प्रकरणादिवच्चादिरिति स्वीकारान्न शक्तिद्वयकल्पनाऽपि। अस्माकं लक्षणाग्रहदशायां बोधात्तत्कार्य-कारणभाव आवश्यकः। एवं शक्तिग्रहस्यापीति पक्षद्वयेऽपि कल्प्यान्तराभावेन गौरवाभावादुभयमपि युक्तमित्यभिमतम्। अत एव -

**'स वाचको विशेषाणां संभवाद् द्योतकोऽपि च'** इति **वाक्यपदीयं** सङ्गच्छते। दर्शनान्तरीत्या वाचकत्वमेव द्योतकत्वमेवेति नियमस्तु न युक्त इति ध्वनयन्नाह-मतमेव न इति ॥(६) ॥४७॥

पर्यवसितुमुपसंहरन्नाह -

**निपातत्वं परेषां यत्तदस्माकमिति स्थितिः ।**

**व्यापकत्वाच्छक्ततायास्त्ववच्छेदकमिष्यते ॥(७) ॥४८॥**

परेषां यन्निपातत्वमसत्त्वार्थकत्वे सति चादिगणपठितत्वम्, शक्तिसम्बन्धेन निपातपदवत्त्वञ्च। जातिर्वा, उपाधिर्वा, तदेवास्माकमपि। परन्तु सामान्यधर्मे प्रमाणानां पक्षपाताच्छक्तता, द्योतकता वा तदवच्छेदेनैव कल्प्येति नैयायिकोक्तं प्रादिचाद्योर्वैषम्यमयुक्तमित्यर्थः। व्यापकत्वात्=सामान्यत्वात्। शक्तताया इत्युपलक्षणं द्योतकताया वेत्यपि द्रष्टव्यम् ॥४८॥

## ॥ इति वैयाकरणभूषणसारे निपातानां द्योतकत्वादिनिर्णयः ॥८॥

## ।।अथ त्वादिभावप्रत्ययार्थनिर्णयः।।

भावप्रत्ययार्थमाह-

**कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम् ।**

**त्वतलोरर्थकथनं टीकायां हरिणा कृतम् (१)  ॥४९॥**

**‘कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेनाऽन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः’** इति **वार्त्तिक**वचनमिति मीमांसकादीनां भ्रममपाकुर्वन्नाह-टीकायामिति। भर्तृहरिणा **महाभाष्यटीका**यामित्यर्थः। त्वतलोरिति भावप्रत्ययमात्रोपलक्षणम्।

अयमर्थः-समासादौ शक्तिः कल्प्यमाना राजादिसम्बन्धविशिष्टे कल्प्यते इत्युक्तम्। तथा च तदुत्तरभावप्रत्ययः सम्बन्धं वदतीत्यर्थः। एतदपि भेदः, संसर्गः, उभयं वेत्युक्तेषु पक्षेषु भेदपक्षे न संभवतीत्यत आह- मतभेदेति। पक्षभेदेनेत्यर्थः।

एवं च राजपुरुषत्वमौपर्गवत्वं पक्तृत्वमित्यादौ स्वस्वामिभावसम्बन्धः, अपत्यापत्यवत्संबन्धः, क्रियाकारकभावसंबन्ध इत्यन्वयबोधः। औपगवादावव्यभिचरितसम्बन्धे त्वर्थान्तरवृत्तिस्तद्धित उदाहार्यः। ‘दामोदरत्वम्’ ‘कृष्णसर्पत्वम्’ इत्यादौ जातिविशेषबोधादाह-अन्यत्रेति। रूढेरभिन्नरूपादव्यभिचरितसम्बन्धेभ्यश्चान्यत्रेत्यर्थः। रूढिरुक्ता। द्वितीयं तथा शुक्लत्वम्। अत्र **“तदस्यास्त्यस्मिनिति मतुप्।”** (पा०सू० ५.२.९४) **‘गुणवचनेभ्यो मतापो लुगिष्टः’** इति लुप्तत्वात् तद्धितान्तत्वेऽपि ‘घटः शुक्लः’ इत्यभेदप्रत्ययाद् गुणस्यैव प्रकारत्वेन भानं जायते। तृतीयम् -सतो भावः सत्तेति। अत्र जातावेव प्रत्यय इति दिक् (१) ॥४९॥

दण्डीत्यादौ प्रकृत्यर्थविशिष्टद्रव्यमात्रवाचकता तद्धितस्येति वदन्तं मीमांसकंमन्यं प्रत्याह-

**अत्रार्धजरतीयं स्याद्दर्शनान्तरगामिनाम्।**

**सिद्धान्ते तु स्थितं पक्षद्वयं त्वादिषु तच्छृणु ॥(२) ॥५०॥**

अत्र-भावप्रत्ययविषये। तथा हि- दामोदरत्वम्, घटत्वमित्यादौ भावप्रत्ययस्य सम्बन्धानभिधायकत्वेन मीमांसकानां दण्डित्वमित्यादिष्वपि तदभिधानं न स्यात्। प्रकृतिजन्यबोधे प्रकारः प्रकृत्यर्थसमवेतो हि तदुत्तरभावप्रत्ययेनाभिधीयते। अन्यथा घटत्वमित्यत्र द्रव्यत्वादेः, दण्डित्वमित्यादौ दण्डादेश्च तदुत्तरभावप्रत्ययवाच्यताऽऽपत्तेः। न च तन्मते दण्डीत्यादिबोधे प्रकारः।

यत्तु,

**यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः।**

**तदा गत्यन्तराभावात्सम्बन्धो वाच्य आश्रितः॥**

इति, तन्न, इनादेः सम्बन्धिवाचकत्वेनोपपत्तौ गत्यभावाभावात्। प्रपञ्चितञ्चैतदादावेव **वैयाकरणभूषणे।**

ननु तवापीदं वैषम्यं कथमित्यत आह - सिद्धान्ते त्विति। ‘जायन्त’ इति वक्ष्यमाणविशेषणेऽन्वितम्। सिद्धान्ते प्रकृतिजन्यबोधे प्रकारे त्वादयो जायन्त इत्यर्थः। प्रकृतिजन्यबोधे प्रकार इत्यत्र पक्षद्वयं स्थितमिति योजना ॥(२) ॥५०॥

तौ पक्षावाह -

**प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारताम्।**

**धर्ममात्रं वाच्यमिति यद्वा शब्दपरा अमी ॥(३)॥५१॥**

**जायन्ते तज्जन्यबोधप्रकारे भावसंज्ञेति।**

प्रयोगे उपाधिनिमित्तं प्रकृत्यर्थप्रकारताम्=प्रकारतया भासमानं धर्मं वाच्यतया आश्रित्य त्वादयो जायन्ते। प्रकृतिजन्यबोधे प्रकारस्त्वाद्यर्थ इति यावत्।

ननु 'घटत्वम्' इत्यत्र प्रकारत्वात् तदुत्तरभावप्रत्ययेन घटत्वत्वस्यापि वाच्यता स्यादित्यत्रेष्टापत्तिमाह-धर्ममात्रमिति। न त्वत्र लघुगुरुविचार इत्यभिप्रायः। तत्तद्व्यक्तिविशिष्टब्रह्मसत्ताया एव घटत्वघटत्वत्वादिरूपत्वात्।

**सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु।**<br>**जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः।**<br>**तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते।**<br>**सा नित्या सा महानात्मा तामाहुस्त्वतलादयः।**

इति वाक्यपदीयात्। उक्तञ्च **"तस्य भावस्त्वतलौ।"** (पा०सू० ५.१.११९) इति सुत्रे **वार्त्तिककारैः - यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ इति।**
यस्य गुणस्य=विशेषणतया भासमानस्य भावात्=आश्रयत्वात् द्रव्ये=विशेष्ये, शब्दनिवेशः=शब्दप्रवृत्तिः, तस्मिन् वाच्ये त्वतलावित्यर्थः। तथा च रूपादिशब्देभ्यो जातौ, शुक्लाणुदीर्घमहदादिभ्यो गुणे, पाचकादिशब्देभ्यः क्रियायाम्, घटादिशब्देभ्यो जातौ प्रत्ययः, रूपादिशब्दानां जातिप्रकारकबोधजनकत्वात्। पाचकादिशब्दानां क्रियाप्रकारकबोधजनकत्वे तस्यां प्रत्ययः।

**'संसर्गप्रकारकबोधजनकत्वम्'** इति मते च संसर्गे इति व्यवस्था सूपपादेति भावः।तत्र जातिवाचकानां व्यक्तय एव शक्यतावच्छेदिकाः, तथाच 'घटत्वम्' इत्यत्र घटवृत्तिरसाधारणो धर्म इति बोध इत्यादि द्रष्टव्यम्।

पक्षान्तरमाह - यद्वेति । **"यद्वा सर्वे भावाः स्वेनार्थेन भवन्ति, स तेषां भावः"** इति **वातिकोक्तेः,** यद्वाशब्दस्तत्सूचनप्रयोजनकोऽपि। भवन्ति वाचकत्वेन प्रवर्तन्ते इति भावाः शब्दाः। स्वेन स्वरूपेणार्थेन भवन्ति प्रवर्त्तन्तेऽतः स तेषां भावः प्रवृत्तिनिमित्तमित्यर्थः। अयं भावः अर्थवच्छब्दोऽपि द्रव्ये प्रकारः, हरिहरनलेक्ष्वाकुयुधिष्ठिरवसिष्ठादिशब्देभ्यस्तत्तद्वाच्यः कश्चिदासीदिति शब्दप्रकारकबोधस्य सर्वसिद्धत्वात्।अन्यथा वनौषधिवर्गादिर्नागरिका- न्प्रत्यबोधकत्वापत्तेश्च। एवमेवाप्रसिद्धार्थकपदेष्वनुभवः सर्वसिद्धो न तु घटादिपदेष्विव तत्तज्जात्यादिरूपेण। तथाचोभयमवच्छेदकम्। (एवमेव प्रसिद्धपदार्थेषु) यस्य यथा शक्तिग्रहस्तस्य जात्यादिरूपेणैवोपस्थितिः। पदप्रकारकः शक्तिग्रहस्तु विशिष्य नापेक्षितः किन्तु 'इदं पदं

क्वचिच्छक्तं साधुपदत्वाद्' इत्यादिरूप एवापेक्ष्यते इति विशिष्यागृहीतशक्तिकेभ्यस्तथैव बोधः। तथाच 'शब्दोऽपि त्वप्रत्यार्थः' इति **प्रपञ्चितं भूषणे** ॥(३) ॥५१॥

## ॥ इति वैयाकरणभूषणसारे भावप्रत्ययार्थनिर्णयः ॥९॥

## ।।अथ देवताप्रत्ययार्थनिर्णयः।।

**"साऽस्य देवता।"** (पा०सू० ४.२.२४) इत्यत्र देवताविशिष्टं देयं प्रत्ययार्थः। 'ऐन्द्री वैश्वदेवी' इत्यादाविन्द्रादेर्देवतात्वोपस्थापकान्तराभावात्, तेन रूपेणोपस्थितये शक्तिकल्पनावश्यकत्वात्।

अत एव-

**आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।**

**आमिक्षापदसानिध्यात्तस्यैव विषयार्पणम् ॥ इति॥**

**केवलाद्देवतावाची तद्धितोऽग्नेः समुच्चरन्।**

**नान्ययुक्तोऽग्निदैवत्यं प्रतिपादयितुं क्षमः ॥इति च॥**

मीमांसकैरप्युक्तमित्याशयेनाह-

**प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् ॥५२॥**

**अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः।**

**देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा ॥५३॥**

एकदेशे=देवतारूपे। तच्च विशेषणमभेदेनेत्याह-अभेदश्चेति। ननु देवतायाः प्रत्ययार्थस्यैकदेशत्वान्न प्रकृत्यर्थ स्य तत्राभेदेनाप्यन्वय इत्याशयेनाह-देवतायामिति। तथा च पदार्थैकदेशतैव नास्तीति भावः (१) ॥५३॥

नन्वग्न्यादिदेवस्य प्रकृत्यैव लाभान्न तत्र शक्तिः कल्प्या। न च देवतात्वेन रूपेणोपस्थितये सा कल्प्यते, प्रकृतेर्ल क्षणयैव तयोपस्थितिसम्भवात्। उपसर्गाणां द्योतकत्वनये 'प्रजयति' इत्यत्र प्रकृष्टजयप्रत्ययवदित्यभिप्रेत्याह -

**प्रदेय एव वा शक्तिः प्रकृतेर्वास्तु लक्षणा।**

**देवतायां निरूढेति सर्वे पक्षा अमी स्थिताः (२) ॥५४॥**

न च 'ऐन्द्रं दधि' इत्यादौ द्रव्यस्य पदान्तराल्लाभात् कुतः पुनः प्रत्ययस्य तत्र शक्तिः कल्प्यत इति वाच्यम्। पदान्तराश्रवणेऽपि तत्प्रतीतेः, 'ऐन्द्रं दधि' इति सामानाधिकरण्याच्च।

अन्यथाऽऽख्यातस्यापि कर्तृकर्मवाचित्वं न स्यात्। मीमांसकानां पुनः प्रत्ययस्य देवतात्वमेवार्थोऽस्तु। द्रव्यं पदान्तराल्लभ्य एवेति आख्यातस्य कर्तृवद्वाच्यत्वं माऽस्त्विति कुतो न शक्यते वक्तुमिति दिक् देवतायां देवतात्वेन रूपेण निरूढेति - अनुपपत्तिज्ञानापूर्वकत्वम्, अनादिप्रयोगावच्छि न्नत्वं वा तत्त्वमिति भावः (२) ॥५४॥

अनयैव रीत्याऽन्यत्राप्यवधेयमित्याह-

**क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता।**

**वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते (३) ॥५५॥**

"**तदस्यां प्रहरणमिति क्रीडायां णः**।" (पा०सू० ४.२.५७) इत्यत्र प्रहरणविशिष्टा क्रीडा, प्रहरणक्रीडे, क्रीडामात्रं वाऽर्थः। आदिना "**सोऽस्य निवासः**।" (पा०सू० ४.३.८९) "**सास्मिन्पौर्णमासीति** ।" (पा०सू० ४.२.२१) "**तदस्यास्त्यस्मिन्निति मतुप्**।" (पा०सू० ५.२.९४) इत्यादिकं संगृह्यते।

वृत्तिमात्रेऽतिरिक्तशक्तेः "**समर्थः पदविधिः**।" (पा०सू० २.१.१) इति सूत्राल्लाभादुक्तो विचारः शास्त्रान्तरीयैः सह तद्रीत्यैवोक्तः। आरोपितप्रकृतिप्रत्ययार्थमादाय वा। वस्तुतो विशिष्टशक्त्यैवार्थो-पस्थितिरित्याह-वस्तुत इति (३) ॥५५॥

**॥ इति वैयाकरणभूषणसारे देवताप्रत्ययार्थनिर्णयः ॥१०॥**

## ।।अथ अभेदैकत्वसङ्ख्यानिर्णयः।।

वृत्तिप्रसङ्गात्तत्राभेदैकत्वसङ्ख्या प्रतीयत इति सिद्धान्तं दृष्टान्तेनोपपादयति-

**अभेदैकत्वसङ्ख्याया वृत्तौ भानमिति स्थितिः।**

**कपिञ्चलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते (१) ॥५६॥**

सङ्ख्याविशेषाणामविभागेन सत्त्वमभेदैकत्वसंख्या। उक्तञ्च **वाक्यपदीये** -

**यथौषधिरसाः सर्वे मधुन्याहितशक्तयः।**

**अविभागेन वर्त्तन्ते संख्यां तां तादृशीं विदुः ॥ इति ॥**

परित्यक्तविशेषं वा संख्यासामान्यं तत्। **उक्तञ्च** -

**भेदानां वा परित्यागात्संख्यात्मा स तथाविधिः ।**

**व्यापाराज्जातिभागस्य भेदापोहेन वर्तते ॥ इति ॥**

**अगृहीतविशेषेण यथा रूपेण रूपवान्।**

**प्रख्यायते न शुक्लादिर्भेदापोहस्तु गम्यते ॥ इति ॥**

अस्या वृत्तौ=समासादौ भानं न्यायसिद्धमिति भावः इति मतस्थितिर्वैयाकरणानाम्।

अयं भावः - 'राजपुरुष' इत्यादौ राज्ञः, राज्ञोः, राज्ञां वाऽयं पुरुष इति जिज्ञासा जायते। विशेषजिज्ञासा च सामान्यज्ञानपूर्विकेति सामान्यरूपेण तत्प्रतीतिः शब्दादावश्यकी। अतस्तस्यां शक्तिरिति। तस्या एकत्वेन प्रतीतौ न्यायमाह-कपिञ्जलेति। बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात् तद्रूपेणैव भानवदेकत्वस्य सर्वतः प्रथमोपस्थितत्वमस्तीति भावः।

वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा। तथात्वे वा ज्ञानेच्छयोः समानप्रकारकत्वेनैव हेतुहेतुमद्भावात्तद्रूपेणैव वाच्यता स्यादिति ध्येयम् (२) ॥५६॥

**॥ इति वैयाकरणभूषणसारे अभेदैकत्वसंख्यानिरूपणम् ॥११॥**

## ।।अथ संख्याविवक्षानिर्णयः।।

संख्याप्रसङ्गादुद्देश्यविधेययोः संख्याविवक्षाविवक्षे निरूपयति-

**लक्ष्यानुरोधात्संख्यायास्तन्त्रातन्त्रे मते यतः ।**

**पश्वेकत्वादिहेतूनामाश्रयणमनाकरम् (१) ॥५७॥**

'ग्रह संमार्ष्टि' इत्यत्रोद्देश्यग्रहगतमेकत्वमविवक्षितमितिवन्नास्माकमुद्देश्यविशेषणाविवक्षा - नियमः, धातोरित्येकत्वस्य विवक्षितत्वात्।

**उत्पद्यते समस्तेभ्यो धातुभ्यः प्रत्ययो यदि ।**

**तदा सर्वैर्विशिष्येत द्वन्द्वोत्पन्नसुबर्थवत् ॥**

इति शब्दान्तराधिकरणे भट्टपादैरभिधानाच्च। **"आर्धधातुकस्येड् वलादेः।"** (पा०सू० ७.२.३५) इत्यत्रानुवाद्यार्द्धधातुकविशेषणस्य वलादित्वस्य विवक्षितत्वाच्च।

एवं 'पशुना यजेत' इतिवद्विधेयविशेषणं विवक्षितमित्यपि नियमो न, **"रदाभ्यां निष्ठातो नः पूर्वस्य च दः।"** (पा०सू० ८.२.४२) इत्यत्र नकारद्वयविधानानापत्तेः। तथा 'भिन्नः' इत्यत्र नकारद्वयलाभो न स्यात्। **"आद्गुणः।"** (पा०सू० ६.१.८७) इत्यादावेकत्वविवक्षयैवोपपत्तौ **"एकः पूर्वपरयोः।"** (पा०सू० ६.१.८४) इत्येकग्रहणवैयर्थ्यापत्तेश्चेति भावः।

शब्दार्थस्तु-संख्याया लक्ष्यानुरोधात्तन्त्रातन्त्रे यतो मते, अतः पश्वेकत्वाधिकरणोक्त- हेतूनामाश्रयणं नास्मत्सिद्धान्तसिद्धमिति। आदिना ग्रहैकत्वग्रहः (१) ॥५७॥

ननु विधेयविशेषणविवक्षावश्यकी अन्यथा 'सुद्ध्युपास्यः' इत्यादावनन्तयकाराद्यापत्तेः। 'भिन्नः' इत्यत्र नकारद्वयवदन्येषामप्यापत्तेः, 'एकः पूर्वपरयोः' इत्यत्रैकग्रहणञ्च स्थानिभेदादादेशभेदवारणायेत्यभिप्रेत्याह -

**विधेये भेदकं तन्त्रमन्यतो नियमो न हि।**

**ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम् (२) ॥५८॥**

भेदकम्=विशेषणम्, तन्त्रम्=विवक्षितम्। विधेयविशेषणं विवक्षितमित्यस्तु, तथाप्यन्यतः=अनुवाद्यस्य नियमो न हि। क्वचित्तन्त्रम्, क्वचिन्नेत्यर्थः। ग्रहैकत्वादौ यो हेतुर्वाक्यभेदादिस्तस्यात्राश्रयणमनाकरम्। एकत्वविशिष्टं धातुम्, वलादित्वविशिष्टमार्द्धधातुकञ्चोदिश्य प्रत्ययेडागमादेर्विधिसम्भवादिति भावः। (२) ॥५८॥

नन्वेवं 'भिन्नः' इत्यत्र नकारद्वयलाभो न स्यादित्यत आह -

**रदाभ्यां वाक्यभेदेन नकारद्वयलाभतः।**

**क्षतिर्नैवास्ति तन्त्रत्वे विधेये भेदकस्य तु (३)॥५९॥**

चकारसूचितम् -निष्ठातस्य नः पूर्वस्य दकारस्य च न इति वाक्यभेदमादाय नकारद्वयलाभ इत्यर्थः (३)॥५९॥

## ॥ इति वैयाकरणभूषणसारे संख्याविवक्षानिर्णयः ॥१२॥

## ।।अथ क्त्वाद्यर्थनिर्णयः।।

क्त्वाप्रत्ययादेरर्थं निरूपयति-

**अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः।**

**समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः (१) ॥६०॥**

तुमादयः=तुमुनादयः, प्रकृत्यर्थे=भावे, आदिना=क्त्वादेः संग्रहः। भावे इत्यत्र मानमाह-अव्ययकृत इति। **'अव्ययकृतो भावे'** इति **वार्त्तिकादि**त्यर्थः।

ननु **"समानकर्त्तृकयोः पूर्वकाले।"** (पा०सू० ३.४.२१) इत्यादिसूत्राणां का गतिस्तत्राह- समानकर्तृकत्वादि।

अयं भावः - 'भोक्तुं पचति' 'भुक्त्वा व्रजति' इत्यादावेकवाक्यता सर्वसिद्धा। भोजनपाकक्रिययोर्वि शेष्यविशेषणभावमन्तरेणानुपपन्ना। अन्यथा 'भुङ्क्ते' 'व्रजति' इत्यादावप्येकवाक्यताऽऽपत्तेः। तथाच तयोर्वि शेष्यविशेषणभावनिरुपकः संसर्गः, जन्यत्वं, सामानाधिकरण्यम् पूर्वोत्तरभावः, व्याप्यत्वञ्चेत्यादिरनेकविधः। तथा च -'भोक्तुं पचति' 'भुक्त्वा तृप्तः' इत्यादौ भोजनजनिका पाकक्रिया, भोजनजन्या तृप्तिरिति बोधः। अत एव जलपानानन्तर्यस्य तृप्तौ सत्त्वेऽपि 'पीत्वा तृप्तः' इति न प्रयोगः।

सामानाधिकरण्यस्यापि संसर्गत्वेनार्थात्समानकर्तृकत्वमपि लब्धम्। 'भुक्त्वा व्रजति' इत्यादौ पूर्वोत्तरभावः सामानाधिकरण्यं च संसर्ग इति भोजनसमानाधिकरणा तदुत्तरकालिकी व्रजनक्रियेति बोधः। 'अधीत्य तिष्ठति' 'मुखं व्यादाय स्वपिति' इत्यादौ चाध्ययनव्यादानयोरभावकालेऽप्रयोगाद्यदा यदास्य स्थितिः स्वापश्च तदा तदाध्ययनं मुखव्यादानञ्चेति कालविशेषावच्छिन्नव्याप्यत्वबोधाद्व्याप्यत्वं सामानाधिकरण्यं च संसर्गः। एवं चान्यलभ्यत्वान्न सूत्रात्तेषां वाच्यतालाभ इति युक्तम् 'अव्ययकृतो भाव' इति। एवं च प्रकृत्यर्थक्रिययोः संसर्ग तात्पर्यग्राहकत्वरूपं द्योतकत्वं क्त्वादीनाम्। अत एव **"समानकर्तृकयोः०।"** (पा०सू० ३.४.२१) इति सूत्रे स्वशव्देनोपात्तत्वान्नेति भाष्यप्रतीकमादाय पौर्वापर्यकाले द्योत्ये क्त्वादिर्विधीयते न तु विषय इति **कैयटः**।

यत्तु - समानकर्तृकयोरिति सूत्रात्समानकर्तृकत्वं क्त्वा वाच्यमन्यथा 'ओदनं पक्त्वाऽहं भोक्ष्ये' इत्यत्र मयेति तृतीयाप्रसङ्गाच्च। न चाख्यातेन कर्त्तुरभिधानान्न सेति वाच्यम्, भोजनक्रियाकर्तुरभिधानेऽपि पाकक्रियाकर्तुस्तदभावात्।अनभिहिते भवतीति पर्युदासा श्रयणात्। अत एव 'प्रासादे आस्ते' इत्यत्र प्रसादनक्रियाधिकरणस्याभिधानेऽप्यस्ति क्रियाधिकरणस्यानभिधानात्सप्तमीति, **भाष्ये** स्पष्टम्। तस्मात् क्त्वाप्रत्ययस्य कर्तृवाचित्वमावश्यकमिति, तन्न, सूत्रात्तस्य वाच्यत्वालाभात्। 'समानकर्तृकयोः क्रिययोः पूर्व काले क्त्वे'त्येव तदर्थात्। अन्यथा समानकर्तरीत्येव सूत्रन्यासः स्यात्। तृतीयापादनं त्वाख्यातार्थक्रियायाः प्रधानभूतायाः कर्तुरभिधानात्प्रधानानुरोधेन गुणे कार्यप्रवृत्तेर्न संभवति।

उक्तञ्च **वाक्यपदीये** -

**"प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।**

**शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते॥**

**प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।**

**यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते" इति ॥**

किं चान्यथा कर्मणोऽपि क्त्वार्थतापत्तिः, पक्त्वौदनो मया भुज्यत इत्यत्र द्वितीयायाः प्रकारान्तरेणावारणात् इत्यास्तां विस्तरः (१) ॥६०॥

**॥ इति वैयाकरणभूषणसारे क्त्वाद्यर्थनिर्णयः ॥१४॥**

## ।।अथ स्फोटनिर्णयः।।

सिद्धान्तनिष्कर्षमाह-

**वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मनस्थितिः ।**

**साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः (१) ॥६१॥**

यद्यपि वर्णस्फोटः, पदस्फोटो वाक्यस्फोटोऽखण्डपदवाक्यस्फोटौ वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्यग्रहणमनर्थकं दुर्थकं च तथापि वाक्यस्फोटातिरिक्तानामन्येषामवास्तवत्वबोधनाय तदुपादानम्। एतदेव ध्वनयन्नाह-अतिनिष्कर्ष इति। मतस्थितिर्वैयाकरणानां महाभाष्यकारादीनाम्। तत्र क्रमेण सर्वास्तान्निरूपयन्वर्णस्फोटं प्रथममाह - साधु शब्द इति। साधुशब्दान्तर्गता वाचका न वेति विप्रतिपत्तिः।विधिकोटिरन्येषां नेति वैयाकरणानाम्। साधुशब्दे पचति राम इति प्रयुज्यमानेऽन्तर्गतास्तिब्विसर्गादय एव बोधका वाचकास्तेषामेव शक्तत्वस्य प्राग्व्यवस्थितत्वान्न तु तैः स्मृताः लादयः स्वादयश्चेत्यर्थः (१) ॥६१॥

ये तु प्रयोगान्तर्गतास्तिब्विसर्गादयो न वाचकास्तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः। 'एधाञ्चके' 'ब्रह्मे'त्यादाावादेशभूतलुगादेरभावरूपस्य बोधकत्वासंभवाच्च। किन्तु तैः स्मृता लकराः स्वादयश्च वाचकाः, लत्वस्य जातिरूपतया शक्ततावच्छेदकत्वौचित्यात्, अव्यभिचाराच्च। आदेशानां भिन्नतया परस्परव्यभिचारित्वात्। **"लः कर्मणि०।"** (पा०सू० ३.४.६९) इत्याद्यनुशासनानुगुण्याच्च। न ह्यादेशेष्वर्थ बोधकमनुशासनमुपलभामहे इत्याहुः।

तान् स्वसाधकयुक्तिभिर्निचष्टे-

**व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा ।**

**किं चाऽऽख्यातेन शत्राद्यैर्लडेव स्मार्यते यदि ॥**

**कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय (२) ॥६२॥**

व्यवस्थानुरोधात्प्रयोगान्तर्गता एव वाचकाः, न तु तत्स्मृता इत्यर्थः। तथा हि -पचतीत्यादौ लकारमविदुषो बोधान्न तस्य वाचकत्वम्। न च तेषां तिङ्क्षु शक्तिभ्रमाद् बोधः, तस्य भ्रमत्वे मानाभावात्। आदेशिनामपि तत्तद्वैयाकरणैः स्वेच्छया भिन्नानामभ्युपगमात्कः शक्तः को नेति व्यवस्थानापत्तेश्च। सर्वेषां शक्तत्वे गौरवम्, व्यभिचारश्चास्त्येव। आदेशानां प्रयोगान्तर्गततया नियतत्वाद्युक्तं तेषां शक्तत्वम्। तथा चादेशिस्मरणकल्पना नेति लाघवम्।

साधकान्तरमाह - व्यवहृतेरिति - व्यवहारस्तावच्छक्तिग्राहकेषु मुख्यः। स च श्रूयमाणतिङादिष्वेवेति त एव वाचका इत्यर्थः।

किञ्च तद्धेतुन्यायत इति - लकारस्य बोधकत्वे 'भू ल' इत्यतोऽपि बोधापत्तिः स्यात्। तादृशे बोधे 'भव्-अती'ति समभिव्याहारोऽपि कारणमिति चेत्तर्ह्यावश्यकत्वादस्तु तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः। अन्यथा लकारस्य वाचकत्वम्, समभिव्याहारस्य कारणत्वञ्चेत्युभयं कल्प्यमिति गौरवं स्यात्। तथा च तादृशसमभिव्याहारः, समभिव्याहृता वर्णा वेत्यत्र विनिगमकाभावात्प्रयोगान्तर्गता वर्णा वाचका इति सिद्ध्यतीति भावः।।

अपि च लकारस्यैव वाचकत्वे कृत्तिङोः कर्तृभावनावाचकत्वव्यवस्थात्वसिद्धान्तसिद्धा न स्यादित्याशयेनाऽऽह-किञ्चेति। आदेशानां वाचकत्वे च तिङ्त्वेन भावनायां शानजादिना कर्तरिशक्ति-रित्युपपद्यते विभाग इति भावः।

न च शानजादौ कृतिर्लकारार्थः, आश्रयः शानजर्थ इत्यस्तु **"कर्तरि कृत।"** **(पा०सू० ३.४.६७)** इत्यनुशासनादिति शङ्क्यम्, स्थान्यर्थेन निराकाङ्क्षतया शानजादौ कतरीत्यस्याप्रवृत्तेरन्यथा घञादावपि प्रवर्तते (२) ॥६२॥

'देवदत्तः पचमानः' इत्यादिसामानाधिकरण्यानुरोधाच्छानचः कर्त्ता वाच्यः स्यादित्याशङ्क्याह -

**तरबाद्यन्ततिङ्क्ष्वस्ति नामता कृत्स्विव स्फुटा।**

**नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्य्यताम् (३) ॥६३॥**

'पचतितरां मैत्रः' 'पचतिकल्पं मैत्रः' इत्यादिषु नामार्थत्वाभेदान्वययोः सम्भव एवेति कर्तृवाचकता स्यादिति भावः। न च पचतिकल्पमित्यत्र सामानाधिकरण्यानुरोधात्कर्त्तरि लक्षणा, 'पचमानः' इत्यत्राप्यापत्तेरिति। लः कर्मणीत्यनुशासनञ्च लाघवात् कल्पिते लकारे कर्त्रादिवाचित्वं कल्पितमादायेत्युक्तम् (३) ॥६३॥

**॥ इति वर्णस्फोटनिरूपणम् ॥**

## ( अथ पदादिस्फोटनिरूपणम्)

**अथादेशा वाचकाश्चेत्पदस्फोटस्ततः स्फुटः (४) ॥६४॥**

एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्ध एवेत्याह - अथेत्यादि। आदेशाः= तिब्विसर्गादयः। अयं भावः - समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिद्ध्यति। प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात् प्रत्येकं वर्णानामर्थवत्वेन प्रातिपदिकत्वापत्तौ **"नलोपः प्रातिपदिकान्तस्य।"** (पा०सू० ८.२.७) इत्यादिभिर्धनम्, वनम् इत्यादौ नलोपाद्यापत्तेश्च। एतच्च चरमवर्णे एव वाचकत्वशक्तिः, शक्तेर्व्यासज्यवृत्तित्वे मानाभावात्। पूर्वपूर्ववर्णानुभवजन्यसंस्काराश्चरमेणार्थधीजनने सहकारिण इति न तन्मात्रोच्चारणादर्थधीरिति वर्णस्फोटवादिनां मतान्तरस्य दूषणायोक्तम्। रामोऽस्तीति वक्तव्ये रामित्यनन्तरं घटिकोत्तरमकारोच्चारणेऽत्यर्थबोधापत्त्या तादृशानुपूर्व्या एव शक्तताऽवच्छेदकत्वौचित्यादिति दिक् (४) ॥६४॥

सुप्तिङन्तं पदमिति पारिभाषिकपदस्य स्वीकर्तृणां मतमाह -

**घटेनेत्यादिषु न हि प्रकृत्यादिभिदा स्थिता।**

**वस्नसादाविवेहापि संप्रमोहो हि दृश्यते (५) ॥६५॥**

घटेनेत्यादौ 'घटे' इति प्रकृतिः, 'न' इति प्रत्ययः। 'घट' इति प्रकृतिः, 'एन' इति प्रत्यय इति विभागस्य 'सर्वे सर्वपदादेशाः' इति स्वीकारे विशिष्य प्रकृतिप्रत्यययोर्ज्ञानासंभवान्न वाचकत्वमित्यर्थः। वैयाकरणैर्विभागः सुज्ञेय इत्यतो दृष्टान्तव्याजेनाह-वस्नासादाविति **"बहुवचनस्य वस्नसौ।"** (पा०सू० ८.१.२१) इति समुदायस्यादेशविधानान्नात्र तद्विभागः सम्भवतीत्यर्थः (५) ॥६५॥

सुप्तिङन्तचयरूपवाक्यस्यापि तदाह -

**हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु।**

**अर्थे विशिष्य सम्बन्धाग्रहणं चेत्समं पदे ॥६६॥**

**लक्षणादधुना चेत्तत्पदेऽर्थेऽप्यस्तु तत्तथा।(६)**

हरेऽव, विष्णोऽव इत्यादौ पदयोः **"एङः पदान्तादति।"** (पा०सू० ६.१.१०९) इत्येकादेशे सति न तद्विभागः सुज्ञानः। तथा च प्रत्येकं पदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात् समुदायेऽप्यावश्यिकी शक्तिः। एवञ्च प्रकृतिप्रत्ययेषु विशिष्याज्ञायमानेष्वपि समुदायव्युत्पत्त्या बोधात्तत्राप्यावश्यिकैव शक्तिरिति भावः।

वस्तुतः पदैः पदार्थबोधवद्वाक्येन वाक्यार्थबोध इति पदार्थशक्तिः पदेष्विव वाक्यार्थशक्तिर्वाक्येऽभ्युपेयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ। अन्यथा घटः कर्मत्वमानयनं कृतिरित्यादौ तादृशव्युत्पत्तिरहितस्यापि बोधप्रसङ्गः।

'घटमानय' इत्यत्रैव पदार्थानामुपस्थितौ सत्यपि तात्पर्यज्ञाने बोधाभावाच्च। तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रादिपदिकोत्तरं कर्मत्ववाचकविभक्तेस्ततो धातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्य कारणभावज्ञानवतो बोधात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः। घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूपवाक्यनिष्ठबोधकता-रूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनात् । अर्थोपस्थापकज्ञानविषयशब्दवृत्तिज्ञानकारणत्वस्यैव शक्तित्वात्। युक्तञ्चैतत् - विषयतासम्बन्धेन शाब्दबोधमात्रे वृत्तिज्ञानस्य लाघवेन हेतुत्वसिद्धेः विवेचितञ्चैत**द्दूषणे**।

ननु वाक्यार्थस्यापूर्वत्वात्कथं तत्र शक्तिग्रह इत्याशङ्क्याऽऽह अर्थ इति। वाक्यस्येति शेषः। वाक्यस्य वाक्यार्थे विशिष्य शक्त्यग्रहणं चेत्तर्हि पदेऽपि समम्। पद एवावयवांशे शक्तिरिति पक्षेऽपि तद्ग्रहासम्भवस्तुल्य इत्यर्थः। यदि च पदशक्तिः पदार्थांशे ज्ञाताऽन्वयांशे चाज्ञातोपयुज्यत इति कुब्जशक्तिवादस्तदा ममापि वाक्यस्य शक्तिरज्ञातैवोपयुज्यत इति वादाभ्युपगमस्तुल्य इति भावः।

ननु वृद्धव्यवहारं पश्यतो मनसा पदार्थवद्वाक्यार्थेऽपि तद्ग्रह इति चेत्तुल्यमित्याह- लक्षणादिति। लक्ष्यते तर्क्य तेऽनेनेति लक्षणं मनस्तस्मात्। अपिपदं पदोत्तरं बोध्यम्। पदेऽपि लक्षणात्तद्ग्रहश्चेत्तर्ह्यस्तु वाक्येऽपीति शेषः। वस्तुतस्तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं तद्ग्रहः। आवापोद्वापाभ्यां परं प्रत्येकं तद्ग्रह इति बोध्यम् (६) ॥६६॥

इयमेव **मीमांसकानां वेदान्तैकदेशिनां च** गतिरित्याह -

**सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः।**

**भाट्टास्तेऽपीत्थमेवाऽऽहुर्लक्षणाया ग्रहे गतिम् (७) ॥६७॥**

**भाट्टा** इति तदनुयायिनां **वाचस्पतिकल्पतरुप्रभृतीनामुपलक्षणम्**।

ननूक्तपक्षद्वयमनुपपन्नम्, उपपत्तेरभिव्यक्तेर्वैकदाऽसंभवेन वर्णसमूहरूपपदज्ञानासंभवात्। तथा च सुतरां तत्समूहरूपवाक्यज्ञानासंभव इति चेन्न, उत्तरवर्णप्रत्यक्षसमयेऽव्यवहितोत्तरत्वसम्बन्धेनोपस्थितपूर्ववर्णवत्त्वं तथा तदुत्तरप्रत्यक्षकाले उपस्थितविशिष्टतद्वर्णवत्त्वं तस्मिन्सुग्रहमिति तादृशानुपूर्वीघटितपदत्वस्यैव वाक्यत्वस्यापि सुग्रहत्वात्। (७)

**॥ इति वाक्यस्फोटनिर्णयः ॥**

## ( अथ अखण्डस्फोटनिरूपणम्)

इदानीमखण्डपक्षमाह-

**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।**

**वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन (८) ॥६८॥**

पदे=पचतीत्यादौ न वर्णाः, नातो वर्णसमूहः पदमिति शेषः। दृष्टान्तव्याजेनाह वर्णेष्विति। एकारौकार-लृकार-ऋकारादिवर्णेष्ववयवाः प्रतीयमाना अपि यथा नेत्यर्थः। क्वचिदित्येव पाठः। एवं वाक्येऽप्याह वाक्यादिति। पदानामपि वाक्याद्विवेको भेदो नास्तीत्यर्थः।

अयं भावः - वाक्यं पदञ्चाऽखण्डमेव न तु वर्णसमूहः। अनन्तवर्णकल्पने मानाभावात्। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकताया व्यञ्जकताया वाऽवच्छेदकं वैजात्यमादायैव ककारो गकार इत्यादिप्रतीतिवैलक्षण्यसंभवात्। स्पष्टं हि **भामत्याम्** - **"तारत्वादि वायुनिष्ठं वर्णेष्वारोप्यते"** इत्युक्तं देवताधिकरणे।

न चैवं वायुसंयोग एव वाचकोऽपि किं न स्यादिति वाच्यम्, प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात्तथा च वाचकत्वान्यथानुपपत्त्या तदेवेदं पदम्, तदेवेदं वाक्यम्, सोऽयं गकारः, इति प्रतीत्या च स्फोटोऽखण्डः सिद्ध्यति। एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवाच्छ्रूयमाणवर्णानामेव वाचकत्वमस्तीत्यपास्तम्, तेषां स्फोटातिरिक्तत्वाभावात्।

यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः। समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानमसंभाव्यमेव। पूर्वपूर्ववर्णानुभवसंस्कारसहकारेणैकदा समूहालम्बनरूपसकलज्ञानसंभवस्तु सरोरसः-जरा-राज-नदी-दीनादिसाधारण इत्यतिप्रसङ्ग इति स्फोट एवाखण्डो नादाभिव्यङ्ग्यो वाचक इति **कैयटः**, तत्तुच्छम्, पदज्ञानसंभवस्योपपादितत्त्वाद्वर्णानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेत्यादिविकल्पग्रासाच्च।

ननु त्वन्मतेऽप्येष दोषः। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेति विकल्पस्य सम्भवादिति[22] चेत्? उच्यते- प्रत्येकमेव संयोगा अभिव्यञ्जकाः परन्तु केचिद् गत्वेन, केचिदौत्वेन, केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैः। अत एव वर्णानां तदतिरेकास्वीकारोऽप्युपपद्यते । एवं चाव्यवहितोत्तरत्वसम्बन्धेन घत्त्वं टकारे गृह्यते, एतादृशपदज्ञानकरणताया अविवादात्। परन्त्वव्यवहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं वाच्यम्। अत एव घज्ञानानन्तरटज्ञानविषयत्वरूपानुपूर्वीत्यादिर्नैयायिकवृद्धानां व्यवहारः। एवञ्च न कश्चिद्दोषः।

एतेन पर्यायस्थलेष्वेक एव स्फोटः, नाना वा? नाद्यः, घटपदे एव गृहीतशक्तिकस्य कलशादेर्बोधप्रसङ्गात्। न च तात्पर्याभिव्यक्तेः शक्तिग्रहतत्पर्यायश्रवणेऽर्थधीहेतुरिति वाच्यम्, एवं सति प्रतिपर्यायं शक्तिग्रहावश्यम्भावेन

[22] सद्भावादिति - in Madhusūdan Penna's edition, p. 645 and Śāsrti's edi. p. 563

तत्तत्पर्यायगतशक्तिग्रहहेतुताया उचितत्वात्। तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवाच्च। अन्यथा तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवात्।

न द्वितीयः, अनन्तपदानां तेषां शक्तिञ्चापेक्ष्य क्लृप्तवर्णेष्वेव शक्तिकल्पनस्य लघुत्वादिति **परिमलोक्तमपास्तम्**। पर्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्धत्वात्तदवच्छेदकानुपूर्व्याः प्रागुपपादनादिति दिक्।

**शब्दकौस्तुभे** तु वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः, अन्यथा कपालातिरिक्तघटाद्यसिद्धिप्रसङ्गश्चेति प्रतिपादितम् (८) ॥६८॥

नन्वेवं शास्त्रस्याप्रामाण्यप्रसङ्गः, पदस्याखण्डत्वात्, शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वादित्याशङ्कां समाधत्ते -

**पञ्चकोशादिवत्तस्मात्कल्पनैषा समाश्रिता ।**

**उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः (९) ॥६९॥**

उपेयप्रतिपत्त्यर्था इत्यन्तेनान्वयः। अयं भावः - यथा **भृगुवल्याम् - "भृगुर्वैवारुणिर्वरुणं ब्रह्म पृष्टवान्। स उवाच - अन्नम्"** इति। तस्योत्पत्त्यादिकं बुद्ध्वा पृष्टे प्राणमनोविज्ञानानन्दात्मकपञ्चकोशोपदेशोत्तरं **"ब्रह्म पुच्छं प्रतिष्ठा"** इति ज्ञेयं ब्रह्म प्रतिपादितम् । तच्च कोशपञ्चकव्युत्पादनं शुद्धब्रह्मबोधनाय । एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति।

ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोऽपि बोधसंभवान्न शास्त्रं तदुपाय इत्यत आह - उपाया इति। उपायस्योपायान्तरादूषकत्वात्। तथा च व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते मन्त्रजन्यमिवार्थस्मरणे, वेदान्तजन्यमिव ब्रह्मज्ञाने। तस्य च ज्ञानस्य यज्ञादीनामन्तः करणशुद्धाविव शरीरादिशुद्धावुपयोगः, साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वञ्च।

तदुक्तं वाक्यपदीये -

**तदद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥**

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।**

**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।**

**अत्रातीतविपर्यासः केवलामनुपश्यति ॥ इति ॥**

न चालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोधः, तस्यालीकत्वासिद्धे- र्वक्ष्यमाणत्वात्। एवं **रेखागवयन्याय** आदिना गृह्यते (९) ॥६९॥

ननु स्फोटस्य वर्णजातीनाञ्च नित्यतया ककार उत्पन्न इति न स्यात् वायुसंयोगनिष्ठजातेः स्फोटे भाने कादिप्रतीतीनां भ्रमत्वापत्तिश्चेत्यत आह -

**कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि।**

**स्वरदैर्घ्याद्यपि ह्यन्ये वर्णेभ्योऽन्यस्य मन्वते (१०) ॥ ७०॥**

स्वीकारस्थलमाह-स्वरदैर्घ्याद्यपीति। आदिनोत्पत्तिविनाशादिसंग्रहः। उदात्तत्वादि न वर्णनिष्ठम्, तस्यैकत्वात्, नित्यत्वाच्च। तच्च, स एवायमिति प्रत्यभिज्ञानात्।

न च गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः। व्यक्त्यंशाभेदस्यापि भासमानस्य विना वाधकं त्यागायोगात्। न चोत्पत्तिप्रतीतिर्वाधिका, प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वात्। अत एव वर्णमुच्चारयतीति प्रत्ययः, न तूत्पादयतीति प्रत्ययो व्यवहारश्च। उच्चरितत्वञ्च - ताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम्। किञ्च व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परयावर्ण निष्ठत्वविषयत्वेनाप्युपपत्तेर्न साऽतिरिक्तवर्णसाधिका। परम्परया वर्णनिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम्। साक्षात्सम्वन्धांशे भ्रम इत्यवशिष्यते।

तदपि सोऽप्यमित्यत्र व्यक्त्यभेदांशे तव भ्रमत्ववत्तुल्यम्। परन्तु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पना नेति लाघवमतिरिच्यते। न च वर्णस्थले ध्वनिसत्त्वे मानाभावः, तदुत्पादकशङ्खाद्यभावेन तदसम्भवश्चेति वाच्यम्, ककाराद्युच्चारणस्थले तत्तत्स्थानस्य जिह्वाया ईषदन्तरपाते वर्णानुत्पत्तेर्ध्वन्युत्पत्तेश्च दर्श नाजिह्वाभिघातजवायुकण्ठसंयोगादेर्ध्वनिजनकत्वकल्पनात्। तस्य च वर्णोत्पत्तिस्थलेऽपि सत्त्वात्तवैव प्रतिवन्ध्यप्रतिवन्धकभावकल्पना निष्प्रमाणिका स्यादिति विपरीतं गौरवम्। एवं परस्परविरोधादुदात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वादिकमपि न वर्णनिष्ठं युक्तमिति तेषामभिप्रायः। एवं चोत्पत्त्यादिप्रतीतीनां तत्प्रमात्वस्य च निर्वाहः परेषामपि समान इति प्रतिवन्द्यैवोत्तरमिति भावः (१०) ॥७०॥

इत्थं पञ्चधा व्यक्तिस्फोटाः।

**जातिस्फोटमाह -**

**शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्।**

**औपाधिको वा भेदास्तु वर्णानां तारमन्दवत् (११) ॥७१॥**

अयं भावः - वर्णास्तावदावश्यकाः। उक्तरीत्या च 'सोऽयं गकारः' इतिवद् 'योऽयं गकारः श्रुतः सोऽयं हकार' इत्यपि स्यात्, स्फोटस्यैकत्वात्, 'गकारोऽयं न हकार' इत्यनापत्तेश्च। किञ्च स्फोटे गत्वाद्यभ्युपेयं न

वा। आद्ये तदेव गकारोऽस्तु, वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात्। तथा चातिरिक्तस्फोटकल्पन एव गौरवम्। अन्त्ये गकारादिप्रतीतिविरोधः, वायुसंयोगवृत्ति, ध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेन्न, प्रतीतेर्विना बाधकं भ्रमत्वासंभवात्। अस्तु वा, वायुसंयोग एव गकारोऽपि तस्यातीन्द्रियत्वं दोष इति चेद्धर्म वदुपपत्तेरिति कृतं स्फोटेन।

तस्मात् सन्त्येव वर्णाः, परन्तु न वाचका गौरवात्। आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकस्यापि युक्तत्वाच्च। इदं हरिपदमित्यनुगतप्रतीत्या हर्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात्।

न च वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः, घटघटत्वादेरपि संयोगविशेषविशिष्टमृदाकारादि-भिश्चान्यथासिद्ध्यापत्तेः। तस्मात्सा जातिरेव वाचिका, तादात्म्येनावच्छेदिका चेति।

ननु सरो रस इत्यादौ तयोर्जात्योः सत्त्वादर्थभेदबोधो न स्यादित्यत आह - औपाधिको वेति। वा त्वर्थे उपाधिरानुपूर्वी, सैव जातिविशेषाभिव्यञ्जिकेति भेदः कारणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः। उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह - वर्णानामिति। (११) ॥७१॥

ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात्प्रत्येकादर्थबोधापत्तिः स्यादित्यत आह-

**अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता।**

**कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः (१२) ॥७२॥**

अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता। योगार्थतया बोधिकेति यावत्। एतेन स्फोटस्य नित्यत्वात् सर्वदार्थबोधापत्तिरित्यपास्तम्। अयं भावः - यद्यपि वर्णस्फोटपक्षे उक्तदोषो[23]ऽस्ति तथापि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति कैश्चिद्व्यक्तयो ध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयन्ते इति शेषार्थः। उक्तं हि **काव्यप्रकाशे - "बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः"** इति (१२) ॥७२॥

ननु का सा जातिस्तत्राह-

**सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ।**

**सत्यं यत्तत्र सा जातिरसत्या व्यक्तव्यो मताः (१३) ॥७३॥**[२४]

---

[23] कथितदोषः - in Madhusūdan Penna's edi. P. 671.

[24] This *Kārikā* originally belongs to *VP* – III.1.32. There is some variation in reading – सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ। सत्यं यत्तत्र सा जातिरसत्या व्यक्तयः **स्मृताः** ॥ *VP*, p. 203

प्रतिभावम्=प्रतिपदार्थम्, सत्यांशो जातिः, असत्या व्यक्तयः। तत्तद्व्यक्तिविशिष्टं ब्रह्मैव जातिरिति भावः। उक्तश्च **कैयटेन - 'असत्योपाध्यवच्छिन्नं ब्रह्मतत्वं द्रव्यशब्दवाच्यमित्यर्थः'** इति। ब्रह्मतत्वमेव शब्दस्वरूपतया इति च। कथं तर्हि ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम्, **"आत्मैवेदं सर्वम् -** इति **श्रुतिवचनात्"** इति **कैयटः** संगच्छताम्? अविद्याऽविद्यको धर्मविशेषो वेति पक्षान्तरमादायेति द्रष्टव्यम् (१३) ॥७३॥

तमेव सत्यांशं स्पष्टयति -

**इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।**

**ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः (१४) ॥७४॥**

अयम्भावः -**'नामरूपे व्याकरणवाणि'** इति श्रुतिसिद्धा द्वयी सृष्टिः। तत्र रूपस्येव नाम्नोऽपि तदेव तत्त्वम्। प्रक्रियांशस्त्वविद्याविजृम्भणमात्रम्।

उक्तञ्च वाक्यपदीये-

**शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।**

**समारम्भस्तु भावानामनादि ब्रह्म शाश्वतम् ॥ इति ॥**

ब्रह्मैवेत्यनेन **'अत्रायं पुरुषः स्वयंज्योतिः' 'तमेव भान्तमनुभाति सर्वम्' 'तस्य भासा सर्वमिदं विभाति'** इति श्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकस्फोटशब्दस्याभिधेयत्वं सूचयति। निर्विघ्नप्रचारायान्ते मङ्गलं स्तुतिनतिरूपमाह - पूर्णात्मने इत्यादिना (१४) ॥७४॥

**अशेषफलदातारमपि सर्वेश्वरं गुरुम् ।**

**श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥१४॥**

**भट्टोजिदीक्षितैः श्रेष्ठैः निर्मिताः कारिकाः शुभाः ।**

**कौण्डभट्टेन व्याख्याताः कारिकास्ताः सुविस्तरम् ॥** [25]

**इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणरङ्गोजिभट्टाऽऽत्मजकौण्ड -**

**भट्टकृते वैयाकरणभूषणसारे स्फोटवादः।**

**समाप्तोऽयं ग्रन्थश्च।**

---

[25] This verse is not found in any other available commentary except शांकरी, p. 677, edited by Madhusūdan Penna.